# Critical Edition of the *Āgamaprāmāṇya* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī*[*]

Kei KATAOKA

## Introduction

Among the sixteen topics that *Nyāyasūtra* 1.1.1 enumerates, means of valid cognition (*pramāṇa*) is the first. Verbal testimony (*śabda*) is accepted by *Naiyāyika*s as one of the four means of valid cognition and defined in *Nyāyasūtra* 1.1.7 as 'teaching by a reliable person' (*āptopadeśa*). Commenting on this sūtra, Bhaṭṭa Jayanta, a Kashmirian author of the latter half of the ninth century, establishes that the four Vedas are authoritative because they are composed by God (*īśvara, parameśvara*), i.e. the omniscient and omnipotent Creator, who has directly perceived dharmas and teaches them out of compassion.(1)

After inserting several subtopics which are relevant to the treatment of the validity of the Vedas,(2) Jayanta raises a question as to whether the same reasoning can also be applied to other scriptures (*āgamāntara*). This is the opening question of the *Āgamaprāmāṇya* section edited here, in which Jayanta examines the validity of other scriptures, i.e. those of Śaivas, Pāśupatas, Pañcarātras, Buddhists, Jainas and so forth.(3)

Clearly Jayanta is well aware of Kumārila's conservative view in the *Tantravārttika* put forward as one of the alternative interpretations of

*Jaiminisūtra* 1.3.3-4. Those sūtras were originally intended to deal with the invalidation of Smṛti-passages that contradict Śrutis. There Kumārila, clearly going far beyond the intention of the Sūtra and the Bhāṣya, denies the authoritativeness of non-Vedic religions or sects (*vedabāhya*), such as Sāṃkhyas, Yoga-Thinkers, Pāñcarātras, Pāśupatas, Buddhists, Jainas, and those who are 'even further outside' (*bāhyatara*) the Vedic tradition.

Jayanta, on the other hand, is more tolerant and approves the authoritativeness of Śaivas, Pāñcarātras and so forth, which, he claims, do not contradict Vedic traditions. Buddhist and other scriptures, however, are criticized as unauthoritative according to the first view that Jayanta presents. But in a second view labelled as that of 'others' (*anye*), Jayanta claims that all scriptures, including Buddhist ones, are authoritative (*sarvāgamaprāmāṇya*), with the exception of those of the Lokāyatas and of untraditional, corrupt sects such as the Nīlāmbaras. The hierarchy of scriptures that Jayanta presupposes, following a traditional fourteen-fold classification of the branches of science (*caturdaśavidyāsthāna*), is as follows:

| | |
|---|---|
| 1-4 | 4 Vedas |
| 5 | Smṛti |
| 6 | Itihāsa, Purāṇa |
| 7-12 | 6 Aṅgas |
| 13 | Mīmāṃsā |
| 14 | Nyāya |
| | Śaiva, Pāśupata, Pañcarātra |
| | Bauddha, Ārhata |
| | Lokāyata, Nīlāmbara, (Saṃsāramocaka) |

This peculiar view of 'the validity of all scriptures' is the main theme of Jayanta's play *Āgamaḍambara*,[4] in which a great Naiyāyika chosen as

an arbitrator (*stheya*), named Bhaṭṭa Sāhaṭa, alias Dhairyarāśi, delivers a long lecture and finally resolves the tension between the orthodox brahmins and Pāñcarātrika Bhāgavatas. Some regard 'the validity of all scriptures', despite it being formally a subtopic belonging to the main theme of 'protecting the Vedas' (*vedarakṣā*), as one of the highlights in the *Nyāyamañjarī*.

## A note on the previous editions

My previous study,[5] though dealing with only a small part of the entire text of the *Nyāyamañjarī*, suggests that editions S (1934, **36**), G (1982, **84**) and N (1975, 78, 84, 89, **92**)——the exact years of the relevant portion are in bold face——do not have any independent value with regard to readings because they are not directly based on original manuscripts. Rather they are based on previous editions. V (1895, **96**) is followed by S, which is again followed by G (V → S → G). N mainly follows M (1969, **83**), and in some cases it follows V, though it is not clear whether it follows V directly or indirectly via S ([V+M] → N).

There are some cases in which S differs from V, G differs from S (and therefore also from V), and N differs from M or V. They are either corrections of apparent mistakes, emendations——frequently mistaken hypercorrections——which do not seem to be based on manuscripts, or simply fresh mistakes. Therefore, in the present article-edition, I decided not to record the readings of these secondary editions in my apparatus.

This hypothesis is further supported by some cases found in the present section, though not reported in the critical apparatus of this edition,

in which S and G follow apparent mistakes of V. For example:

> *prāmāṇyam/ etenetihāsapurāṇaprāmāṇyam api nirṇītaṃ veditavyam/ itihāsapurāṇaṃ*] $MNA_1B_1K_1$; om. VSG
>
> *bhavatu prāmāṇyam/ prāmāṇye tāvad avivādaḥ/ sadācārasyāpy anupanibaddhasya vedamūlatvād eva bhavatu prāmāṇyam*] $MA_1B_1$; *bhavatu prāmāṇyam* VSG (eyeskip); *bhavatu prāmāṇyam/ teṣāṃ prāmāṇye tāvad avivādaḥ/ sadācārasyāpy anupanibaddhasya vedamūlatvād eva bhavatu prāmāṇyam* N; *bhavitu pramāṇa++māṇye tāvad avivādaḥ sadācārasyāpy anu+++++++mūlatvād eva bhavatu prāmāṇyaṃ* $K_1$

In both cases it is clear that S and G blindly——*jātyandhaparaṃparayā*—— follow V.

## Editions consulted and abbreviations

V　*The Nyāyamañjarī of Jayanta Bhaṭṭa*. 2 parts. Ed. Gaṅgādhara Śāstrī Tailaṅga. Vizianagaram Sanskrit Series, No. 10. Benares: E.J. Lazarus & Co., 1895, 1896.

M　*Nyāyamañjarī of Jayantabhaṭṭa with Ṭippaṇi —— Nyāyasaurabha by the Editor*. Ed. K.S. Varadācārya. 2 vols. Mysore: Oriental Research Institute, 1969, 1983. [It reports in the footnotes the variants of a previous edition (*mudritakośa*) designated as "kha". Because they accord with the readings of V (probably via

S), I do not separately report them.]

$M^{ka}$ Variants reported in M as "ka", a paper manuscript preserved in the Oriental Research Institute, Mysore, according to the *prastāvanā* of the first volume.

$M^{back}$ Variants of the Allahabad manuscript (=$A_1$) as well as the editor's own corrections given in the back of the first volume.

## Consulted manuscripts and abbreviations

I consulted three manuscripts for editing the present section.

$A_1$ A manuscript preserved in the Ganganatha Jha Kendriya Sanskrit Vidyapeetha, Allahabad, No. 833/52. Devanāgarī. Paper. Complete. 660 folios.

$B_1$ A manuscript preserved in Banaras Hindu University, S. No. 3C/2435 (=No. C1015). Kashmirian Devanāgarī. Paper. Incomplete.(6) [I thank Mr. Shinya Moriyama for obtaining on my behalf a copy of this manuscript from the library.]

$K_1$ A manuscript preserved in the Malayalam Department of the University of Calicut, No. 2602. Malayalam script. Palm leaf. 177 folios. Incomplete. ff. 97r9-101r9. [I thank Dr. Dominic Goodall for kindly making accessible to me his photographs of this manuscript.]

The Chennai manuscript (=$C_1$), which I consulted for preparing the previous article-edition on *Vijñānādvaita*, does not contain this section. The Lucknow manuscript (=$L_1$) written in Śāradā script contains only a few lines of the beginning portion of this section.

$L_1$　A manuscript preserved in the Akhila Bharatiya Sanskrit Parishad, Lucknow, Serial No. 27E, Access No. 2381. Śāradā script. Paper. 138 folios. Incomplete. f. 138r19-22.

Regrettably we therefore have no Kashmirian manuscript for the rest of this section, and for editing a Kashmirian text we would ideally like to be able to consult Kashmirian manuscripts.

## Primary texts refered to

See the bibliography in Kataoka [2003]. The following additional texts are referred to in this edition.

A: *Śrīmajjaiminipraṇītaṃ Mīmāṃsādarśanam*. Ed. Subbāśāstrī. 6 bhāgas. Poona: Ānandāśramamudraṇālaya, 1929-34.

*Āgamaḍambara: Āgamaḍambara Otherwise Called Ṣaṇmatanāṭaka of Jayanta Bhaṭṭa*. Ed. V. Raghavan & Anantalal Thakur. Darbhanga: Mithila Institute, 1964.

*Ṛgveda: Die Hymnen des Ṛigveda*. Ed. Theodor Aufrecht. 2 vols. Bonn: Adolph Marcus, 1877.

*Jaiminisūtra*: See A.

*Tattvasaṅgraha: Tattvasangraha of Ācārya Shāntarakṣita with the Commentary Pañjikā of Shri Kamalashīla*. Ed. Dvārikadāsa Śāstrī. 2 vols. Varanasi: Baudha Bharati, 1981, 1982.

*Tantravārttika*: See A.

*Taittirīyāraṇyaka: The Taittiri'ya A'raṇyaka of the Black Yajur Veda*. Ed. Ra'jendrala'la Mitra. Calcutta: Asiatic Society of Bengal, 1872.

*Nirukta: The Nighaṇṭu and the Nirukta*. Ed. Lakshman Sarup. Delhi:

Motilal Banarsidass, 1984.

*Bṛhadāraṇyakopaniṣad: Bṛhadâraṇjakopanishad in der Mādhjaṃdina Recension*. Ed. O. Böhtlingk. St. Petersburg: Comissionäre der Kaiserlichen Akademie der Wissenschaften, 1889.

*Manusmṛti: Mânav Dharma-Śâstra*. Ed. J. Jolly. London: Trubner & Co., Ludgate Hill, 1887.

*Mahābhārata: The Mahābhārata*. Ed. V.S. Sukthankar et al. Poona: Bhandarkar Oriental Research Institute, 1927-59.

*Yājñavalkyasmṛti: Yâjñavalkyasmriti or the Institutes of Yajnavalkya*. Ed. Bapu Shastri Moghe. Bombay: Janardan Mahadev Gurjar, 1892.

*Vinayasūtra: Vinaya-sūtra and Auto-commentary on the Same*. Ed. P.V. Bapat and V.V. Gokhale. Patna: Kashi Prasad Jayaswal Research Institute, 1982.

*Viṣṇupurāṇa: Śrīmanmaharṣivedavyāsapraṇītam Viṣṇupurāṇam*. Vol. 1. Ed. H.H. Wilson. Delhi: Nag Publishers, 1989 (Reprint).

*Śābarabhāṣya: Materialien zur ältesten Erkenntnislehre der Karmamīmāṃsā*. E. Frauwallner. Wien: Hermann Bölaus Nachf. (for the Tarkapāda); see A (for the rest).

*Ślokavārttikakāśikā: Mīmāṃsāślokavārttikaṃ, Sucaritamiśrapraṇītayā Kāśikākhyayā Ṭīkayā sametam*. Ed. K. Sāmbaśiva Śāstrī (Part I, II). Trivandrum: CBH Publications, 1990; Ed. V.A. Rāmasvāmi Śāstrī (Part III). Trivandrum: University of Travancore, 1943.

* I thank Mr. Csaba Dezső, Dr. Dominic Goodall, Prof. Harunaga Isaacson and Dr. Alex Watson for comments.

1　See in particular NM I 401.1-5 in the Mysore edition.

2　See NM I 412.11-415.3 for the index of these subtopics.

3　For the historical and theoretical background, and for a survey and analysis of this section, see Albrecht Wezler 1976 "Zur Proklamation religios-weltanschaulicher Toleranz bei dem indischen Philosophen Jayantabhaṭṭa." in *Saeculum* 27, 329-347.

4　Mr. Csaba Dezső (Balliol College, Oxford) has prepared a critical edition and an annotated translation of the *Āgamaḍambara* for his D.Phil thesis.

5　Kei Kataoka "Critical Edition of the *Vijñānādvaita* Section of Bhaṭṭa Jayanta's *Nyāyamañjarī.*" *The Memoirs of the Institute of Oriental Culture*, 144, 2003, 318-278(115-155).

6　Correction of the wrong information in my previous article-edition (Kataoka 2003:315), in which I describe the manuscript as 'Complete'. In my photocopy, however, f. 1 is missing. After ff. 2r-83v, which cover NM I 7.3-II 15.13 in the Mysore edition, there is a big gap in the middle. Then there are ff. 50r-80r, which cover NM II 408.5-583.6.

# न्यायमञ्जरी।
# आगमप्रामाण्यम्

## [1 वेदान्यागमप्रामाण्यम्]

आह —

किमेतदित्थं प्रामाण्यं वेदानामेव साध्यते।
उतागमान्तराणां वा सर्वेषामियमेव दिक्॥

किंचातः।

आद्ये पक्षे परेष्वेवं ब्रुवाणेषु किमुत्तरम्।
उत्तरत्र तु मिथ्या स्युः सर्वे ऽन्योन्यविरोधतः॥

कानि पुनरागमान्तराणि चेतसि विधायैवं वत्सः पृच्छति — पुराणेतिहासधर्मशास्त्राणि वा शैवपाशुपतपञ्चरात्रबौद्धार्हतप्रभृतीनि वा। तत्र शैवादीनि तावन् निरूपयिष्यामः।

---

**8** ··· पृच्छति ] The end of $L_1$ (f. 138r22)

---

**3** किमेतदित्थं ··· दिक् ] Cf. *Āgamaḍambara* 81.20–21: पञ्चरात्राद्यागमाः प्रमाणमप्रमाणं वेति वादिनामिह विप्रतिपत्तिः।
**6** परेष्वेवं ब्रुवाणेषु ] *Nyāyamañjarīgranthibhaṅga* 108.20–21: परेष्वेवं ब्रुवाणेषु। यथा भवद्भिर्वेदानां प्रामाण्यं साध्यत ईश्वरप्रणीतत्वेन तन्त्रागमान्तराणामपि तथैव प्रतिपादयत्सु; cf. *Tantravārttika* ad 1.3.11 (A 235.10–11): यावदेवोदितं किंचिद् वेदप्रामाण्यसिद्धये। तत्सर्वं बुद्धवाक्यानामतिदेशेन गम्यते॥
**10** निरूपयिष्यामः ] See section 5.1

---

**4** उता° ] $MA_1B_1K_1L_1$; तन्त्रा° V **4** °षामिय° ] $MVA_1B_1L_1$; +++ $K_1$ **7** °विरोधतः ] $B_1K_1L_1$; °विरोधिनः $MVA_1$ **8** °रागमान्त° ] $MVB_1K_1L_1$; °रामांत° $A_1$ **8** वत्सः पृच्छति ] $MVA_1B_1L_1$; वत्स पृच्छसि $K_1$ **9** °पतपञ्चरात्रबौद्धा° ] $MVA_1B_1$; ++++++++ $K_1$

## [2 स्मृतिप्रामाण्यम्]

मन्वादिप्रणीतानि धर्मशास्त्राणि वेदवत् तदर्थानुप्रविष्टविशिष्टकर्मोपदेशीनि प्रमाणमेव, कस्तेषु विचारः।

### [2.1 वेदमूलत्वादिति मीमांसकाः]

#### [2.1.1 वेदमूलत्वकारणानि]

तेषां तु प्रमाणत्वं वेदमूलत्वेन केचिदाचक्षते। तथा हि न तावन् मन्वादिदेशना भ्रान्तिमूलाः संभाव्यन्ते, बाधकाभावात्, अद्ययावदपरिस्खानादरैर्वेदविद्भिस् तदर्थानुष्ठानात्। नाप्यनुभवमूलाः, प्रत्यक्षस्य त्रिकालानवच्छिन्नकार्यरूपधर्मपरिच्छेदसामर्थ्यासंभवात्। न च पुरुषान्तरोपदेशमूलाः, पुरुषान्तरस्यापि तदवगमे प्रमाणा-

---

**2** °नुप्रविष्ट° ] Cf. *Nyāyamañjarī* I 614.11-13: विक्षिप्तशाखान्तरोपदिष्टविशिष्टज्योतिष्टोमाद्यनेककर्मानुप्रविष्टहौत्राध्वर्यवादिव्यापारव्यतिषङ्गदर्शनात्; *Nyāyamañjarīgranthibhaṅga* 108.22–23: तदर्थानुप्रविष्टेति। वेदार्थे ऽनुष्ठेये ऽनुप्रविष्टानि "आचान्तेन कर्तव्यम्" "शुचिना कर्तव्यम्" इत्यादीनि यानि शौचाचमनादीनि कर्माणि।

**9** त्रिकालानवच्छिन्न° ] *Nyāyamañjarī* I 263.11–14: न धर्मं प्रति प्रमाणं प्रत्यक्षम्, विद्यमानोपलम्भनत्वात् (*Jaiminisūtra* 1.1.4)। विद्यमानार्थग्राहित्वादित्यर्थः। धर्मश्च न वर्तमानः, त्रिकालानवच्छिन्नस्य तस्य "यजेत" "दद्यात्" "जुहुयात्" इत्यादिशब्देभ्यः प्रतीतेः।

**9** °परिच्छेदसामर्थ्या° ] Cf. *Nyāyamañjarī* II 40.19: स्वाकारविषयत्वेन वा परस्परभेदाभेदपरिच्छेदसामर्थ्यासंभवात्; II 275.11: मनष्षष्ठैरिन्द्रियनिरपेक्षपदार्थपरिच्छेदसामर्थ्यपक्षे च सर्वसर्वज्ञतापत्तिः।

---

**2** °णीतानि ] $MVA_1B_1$; °णीतानि तु $K_1$　**2** °विशिष्ट° ] $MVB_1K_1$; °विशिष्टविशिष्ट° $A_1$　**3** °पदेशीनि ] $MVA_1K_1$; °पदेशानि $B_1$　**6** तु प्रमाणत्वं ] $MVA_1B_1$; ++माण्यं $K_1$　**6** °त्वेन ] $K_1$; °त्वेनैव $MVA_1B_1$　**6** हि न तावन् म° ] $MVB_1$; हि तावन् म° $A_1$; +++++$K_1$　**7** °देशना ] $MVA_1B_1$; °दर्शनानु° $K_1$　**9** °सामर्थ्यासं° ] em.; °दशासामर्थ्यासं° $MVA_1B_1$; °साम++भा° $K_1$

भावात्। भावे वा मनुना किमपराद्धम्। असति हि मूलप्रमाणे पुरुषवचनपरंपरायामेव कल्प्यमानायाम् अन्धपरंपरास्मरणतुल्यत्वं दुर्निवारम्। न च — विप्रलम्भका एव भगवन्तो मन्वादय एवमुपदिशेयुः — इति युक्ता कल्पना, बाधकाभावात्साधुजनपरिग्रहाच्चेत्युक्तम्। तस्मात्पारिशेष्याद् वेदाख्यकारणमूला एव भवितुमर्हन्ति मन्वादिदेशनाः। तद्धनुगुणं समर्थं च कारणमिति। तदाह भट्टः —

भ्रान्तेर् अनुभवाद्वाऽपि पुंवाक्याद् विप्रलम्भनात्।

---

2 अन्धपरंपरा° ] *Śābarabhāṣya* ad 1.3.1 (A 162.3–163.1): अष्टकादिषु त्वदृष्टार्थेषु पूर्वविज्ञानकारणाभावाद् व्यामोहस्मृतिरेव गम्यते। तद्यथा कश्चिज्जात्यन्धो वदेत् "स्मराम्यहमस्य रूपविशेषस्य" इति। "कुतस्ते पूर्वविज्ञानम्" इति च पर्यनुयुक्तो जात्यन्धमेवापरं विनिर्दिशेत्। "तस्य कुतः?" "जात्यन्धान्तरात्"। एवं जात्यन्धपरंपरायामपि सत्यां नैव जातुचित् संप्रतीयुर्विद्वांसः सम्यग्दर्शनमेतदिति; *Nyāyamañjarīgranthibhaṅga* 108.23–25: अन्धपरंपरास्मरणतुल्यत्वमिति यथान्धो रूपविशेषोपलम्भं प्रति पृष्टोऽन्धान्तरोक्तं स्मृत्वा कथयति "तेन ममैवमाख्यातम्" इति।

5 °त्युक्तम् ] above in the same paragraph.

7 भ्रान्तेर् ··· लघीयसी ] *Tantravārttika* ad 1.3.2 (A 163.19–164.3): मन्वादीनां चाप्रत्यक्षत्वात् तद्विज्ञानमूलमदृष्टं किंचिदवश्यं कल्पनीयम्। तत्र च — भ्रान्तेरनुभवाद्वापि पुंवाक्याद्विप्रलम्भनात्। दृष्टानुगुण्यसाध्यत्वाच्चोदनैव लघीयसी॥ सर्वत्रैव चादृष्टकल्पनायां तादृशं कल्पयितव्यं यद् दृष्टं न विरुणद्धि, न वाऽदृष्टान्तरमासञ्जयति। तत्र भ्रान्तौ तावत् सम्यङ्निबद्धशास्त्रदर्शनविरोधापत्तिः सर्वलोकाभ्युपगतदृढप्रामाण्यबाधश्च। तदा-(तदा° ] ms.; इदा° ed.)नींतनैश्च पुरुषैरपि भ्रान्तिर्मन्वादीनामनुवर्तिता, तत्परिहारोपन्यासश्च मन्वादीनामित्यनेकादृष्टकल्पना। अनुभवे ऽपि स एव तावदनुभवः कल्पयितव्यः। पुनश्चेदानींतनसर्वपुरुषजातिविपरीतसामर्थ्यकल्पना मन्वादेः, तच्चैतत् सर्वज्ञवादे निराकृतम्। पुरुषवाक्यपरंपरा-(°परंपरा° ] ms.; °परा° ed.)प्यन्धपरम्परया निराकृता। न

---

1 मूल° ] MVA$_1$B$_1$; मूलं K$_1$ 2 कल्प्यमा° ] MVB$_1$K$_1$; कल्पमा° A$_1$ 3 भगवन्तो ] K$_1$; भवन्तो MVA$_1$B$_1$ 5 तस्मा° ] MVB$_1$K$_1$; दादाह भट्टः भ्रांतेरनुभवाद्वापि पुंवाक्याद्विप्रलंभकात् दृष्टानु तस्मा° A$_1$ 7 विप्रलम्भनात् ] K$_1$; विप्रलंभकात् MVA$_1$B$_1$

दृष्टानुगुण्यसामर्थ्याच्चोदनैव लघीयसी॥

इति॥

## [2.1.2 वेदमूलत्वपक्षावान्तरभेदः]

तत्र केचित् परिदृश्यमानमन्त्रार्थवादबलोन्नीतविधिमूलत्वं मन्यन्ते। अन्ये विप्रकीर्णशाखामूलत्वम्। अपरे पुनरुत्सन्नशाखामू-

---

हि निष्प्रतिष्ठप्रमाणात्मलाभो दृश्यते। तथा विप्रलम्भे ऽपि तत्कल्पना। विप्रलिप्सा प्रयोजनं लोकस्य च तत्र भ्रान्तिस्तस्याश्चेयन्तं कालमनुवृत्तिरित्याद्याश्रयणीयम्। उत्पन्नस्य च दृढस्य प्रत्ययस्य प्रामाण्यनिराकरणाद् दृष्टविरोधः। तस्मात्सर्वेभ्यश्चोदनाकल्पनैव ज्यायसी। तत्र हि तन्मात्रादृष्टाभ्युपगमः। शेषास्तु महाजनपरिग्रहादयः सर्वे ऽनुविधीयन्ते। संभाव्यते च मन्वादीनां चोदनापूर्वविज्ञानकारणत्वेन। (I thank Mr. Csaba Dezső for notifying me of the variants in the British Library manuscript, No. 5901, Burnell 413.); *Nyāyamañjarīgranthibhaṅga* 108.26–109.2: भ्रान्तेरनुभवाद्वेति। एभ्यः सकाशान्मूलत्वेनाश्रीयमाणा चोदनैव लघीयसी कल्पनारहिता। दृष्टानुगुण्यसामर्थ्यादित्यत्र दृष्टानुगुण्यसाध्यत्वादिति पाठान्तरमन्ये वदन्ति, व्याचक्षते च दृष्टानुगुण्यं साध्यं यस्याः सा दृष्टानुगुण्यसाध्या तद्भावस्तत्त्वम्। यदेतद् दृष्टं वेदविदनुष्ठानं तदानुगुण्यं चोदनामूलत्वे सति साध्यं भवति सिद्ध्यतीत्यर्थः।

4 तत्र केचित् ] Cf. *Āgamaḍambara* 83.20–84.2: स्मृतिरियमर्थवादजनितेति ··· यथाष्टकादिस्मृतिमूलभूता नित्यानुमेयाः श्रुतयस्त्वयोक्ताः; *Tantravārttika* ad 1.3.2 (A 164.7–8): तत्र केचिदाहुः। नित्यानुमेयास्ता न कदाचिदुच्चार्यन्ते यथालिङ्गादिकल्पिताः।

4 परिदृश्यमानमन्त्रार्थवाद° ] *Śābarabhāṣya* ad 1.3.2 (A 165.9–10): अष्टकादिलिङ्गाश्च मन्त्रा वेदे दृश्यन्ते "यां जनाः प्रतिनन्दन्ति" इत्येवमादयः; *Nyāyamañjarīgranthibhaṅga* 109.3–5: परिदृश्यमानमन्त्रार्थेति। "यां जना अभिनन्दन्ति" इति मन्त्रार्थवादात् "अष्टकाः कर्तव्याः" इति स्मृतेः, "धन्वन्निव प्रपा असि त्वमग्ने" इत्यतः "प्रपाः प्रवर्तयितव्याः" इत्यस्याः स्मृतेरुत्थानम्।

5 अन्ये विप्रकीर्णशाखामूलत्वम् ] *Tantravārttika* ad 1.3.2 (A 164.16–19): यद्वा विद्यमानशाखागतश्रुतिमूलत्वमेवास्तु। कथमनुपलब्धिरिति चेत्, उच्यते — शाखानां विप्रकीर्णत्वात् पुरुषाणां प्रमादतः। नानाप्रकरणस्थत्वात् स्मृतेर्मूलं न

लत्वमिति। अनेन च विशेषविवरणेन न नः प्रयोजनम्। सर्वथा यथोपपत्ति वेद एव तत्र मूलं कल्प्यताम्, न मूलान्तरम्, अप्रमाणकत्वात्।

## [2.1.3 स्मृतिशब्दार्थानुगुण्यम्]

वेदमूलत्वपक्षे चेयमखिलजगद्विदिता स्मृतिसमाख्याऽनुगृहीता भविष्यति। प्रत्यक्षमूलत्वे हि वेदवदत्रापि कः स्मृतिशब्दार्थः। 5

## [2.1.4 श्रुतिस्मृतिविरोधः]

किंच वेदमूलत्वे सति स्मृतेः श्रुतिविरोधे सति तदतुल्यक-

---

दृश्यते॥ Cf. *Tantravārttika* ad 1.3.4 (A 187.16–18): शाखान्तरविप्रकीर्णानि हि पुरुषान्तरप्रत्यक्षाण्येव वेदवाक्यानि ··· परोक्षाण्यपि व्यज्यमानानि पिण्डीकृत्य स्मर्यन्ते; *Nyāyamañjarīgranthibhaṅga* 109.5–7: विप्रकीर्णशाखामूलत्वमिति। विप्रकीर्णा याः काश्चित् क्वचिदेव देशे पठ्यन्ते न सर्वाः सर्वत्र, अतस्तदर्थस्यैकत्र ढौकयितुमशक्यत्वात् स्मृत्युपनिबन्धस्तदर्थसंकलनानिमित्तकः।

1 °रुत्सन्नशाखामूलत्व° ] *Tantravārttika* ad 1.3.2 (A 164.14–15): तेन वरं प्रलीनश्रुत्यनुमानमेव। न च प्रलयो न संभाव्यते। दृश्यते हि प्रमादालस्यादिभिः पुरुषक्षयाच्चाल्पविषयत्वम्; cf. *Tantravārttika* ad 1.3.4 (A 194.30–195.2): यैश्च मानवादिस्मृतीनामप्युत्सन्नवेदशाखामूलत्वमभ्युपगतं तान्प्रति सुतरां शाक्यादिभिरपि शक्यं तन्मूलत्वमेव वक्तुम् ··· ततश्च यावत्किंचित्कियन्तमपि कालं कैश्चिदाद्रियमाणं प्रसिद्धिं गतं तत्प्रत्यक्षशाखाविसंवादे ऽप्युत्सन्नशाखामूलत्वावस्थानमनुभवतुल्यकक्षतया प्रतिभायात्; ad 1.3.1 (A 161.12–13): मृतसाक्षिकव्यवहारवच्च प्रलीनशाखामूलत्वकल्पनायां यस्मै यद् रोचते स तत् प्रमाणीकुर्यात्; ad 1.3.1 (A 163.8–9): यदि तु प्रलीनशाखामूलता कल्प्येत ततः सर्वासां बुद्धादिस्मृतीनामपि तद्वारं प्रामाण्यं प्रसज्यते; *Nyāyamañjarīgranthibhaṅga* 109.8–9: उत्सन्नशाखेति। याः शाखा अन्यैः कैश्चिन्न पठ्यन्ते ता एव तु स्मृतिकाराः पठन्ति, तैरन्याख्यात्रभावेनोत्सादमाशङ्कमानैस्तदर्थं ग्रन्थोपनिबन्धः कृतः।

---

1 च ] MVA$_1$B$_1$; तु K$_1$ 1 °विवरणेन ] MVA$_1$B$_1$; °विवारणेन K$_1$ 2 कल्प्यताम् ] A$_1$K$_1$; प्रकल्प्यताम् MVB$_1$ 5 °पक्षे ] K$_1$; °पक्षे ऽपि MVA$_1$B$_1$ 8 श्रुतिविरोधे ] MVA$_1$B$_1$; श्रुतिस्मृतिविरोधे K$_1$

क्ष्यत्वाद् बाध्यत्वं सुवचं भवति। क्लृप्तमेकत्र मूलम्, इतरत्र कल्प्यम्। यावदेव भवान् स्मृतेः श्रुतिं कल्पयितुं व्यवस्यति, तावदेवेयं तद्विरोधिनी प्रत्यक्षश्रुता श्रुतिरवतरति हृदयपथम् — इति कथं तदा मूलकल्पनायै स्मृतिः प्रभवेत्। तदाह —

5　सो ऽयमाभाणको लोके यदश्वेन हृतं पुरः।
　तत् पश्चाद् गर्दभः प्राप्तुं केनोपायेन शक्नुयात्॥

इति।

अपर आह — विकल्प एवात्र युक्तः। किल द्विविधो वेदः श्रूयमाणो ऽनुमीयमानश्च। श्रूयमाणश्च श्रुतिरित्युच्यते, अनुमीयमानश्च
10 स्मृतिरिति। द्वावपि चैतावनादी इति किं केन बाध्यते। व्यक्ताव्यक्तो

---

**1** तदतुल्यकक्ष्यत्वाद् ] *Tantravārttika* ad 1.3.3 (A 175.1–2): स्मृतेर् धर्मप्रमाणत्वं न तावत्स्वत इष्यते। तुल्यकक्षतया येन विकल्पपदवीं व्रजेत्॥

**1** क्लृप्तमेकत्र मूलम्, इतरत्र कल्प्यम् ] *Śābarabhāṣya* ad 1.3.3 (A 184.1): तत्र स्पर्शनस्य क्लृप्तं मूलम्, कल्प्यं स्मृतेः।

**5** सो ऽयमाभाणको ··· शक्नुयात् ] *Tantravārttika* ad 1.3.3 (A 177.7–12): न च शीघ्रहृते ऽर्थे ऽस्ति चिरादागच्छतो गतिः। अश्वैरपहृतं को हि गर्दभैः प्राप्तुमर्हति॥ स्मृत्या चार्थं परामृश्य यावत्तद्विषयां श्रुतिम्। अनुमातुं प्रवर्तेत तावत्सो ऽर्थो ऽन्यतो गतः॥ किं कर्तव्यमितीदं च कर्ता यावदपेक्षते। प्रमाणं क्रमते तावत्प्रमिते तन्न जायते॥

**8** विकल्प ] *Tantravārttika* ad 1.3.4 (A 188.13–14): ततश्च श्रुतिमूलत्वाद् बाध्योदाहरणं न तत्। विकल्प एव हि न्याय्यस्तुल्यकक्षप्रमाणतः॥

---

**1** °तुल्यकक्ष्य° ] $MA_1B_1$; °तुल्यकक्ष° $VK_1$　**1** °त्र ] $MVA_1B_1$; °त्र तु $K_1$　**2** °यितुं व्यवस्यति ] $MVA_1B_1$; °यितुमध्यवस्यति $K_1$　**3** तावदेवेयं तद्विरोधिनी ] $K_1$; तावद् एतद्विरोधिनी $MVA_1B_1$　**3** प्रत्यक्षश्रुता ] $MVB_1K_1$; प्रत्यक्षता $A_1$　**4** °नायै ] $MVK_1$; °नायैव $A_1B_1$　**5** पुरः ] $M^{ka}A_1B_1K_1$; पुरा MV　**6** प्राप्तुं ] $MVB_1K_1$; प्राप्तु $A_1$　**7** इति ] $MVA_1B_1$; om. $K_1$　**8** वेदः ] $MVA_1B_1$; भेदः $K_1$　**9** °मीयमानश्च ] $MVA_1B_1K_1^{pc}$; °मीयमानोश्च $K_1^{ac}$　**9** श्रूयमाणश्च ··· अनुमीयमानश्च ] $MVB_1$; om. $A_1$(eyeskip); श्रूयमाण° ··· अनुमीयमानश्च $K_1$　**10** किं केन ] $MVB_1K_1$; किं न $A_1$

हि वेद एवासौ। अत एव न मन्त्रार्थवादादिमूलत्वकल्पनं युक्तम्, स्मर्यमाणस्य वेदस्यानादित्वात्।

## [2.1.5 कर्तृसामान्यम्]

नन्वेवं वेदमूलत्वेन प्रामाण्ये वर्ण्यमाने बाह्यस्मृतीनामपि प्रामाण्यं वदन्तः प्रवादुकाः कथं प्रतिवक्तव्याः।

उच्यते। प्रत्युक्ता एव ते तपस्विनः। उक्तं हि भगवता जैमिनिना "अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्" इति। "कर्तृसामान्यात्" इति को ऽर्थः। "एकाधिकारावगमात्" इति। य एव वेदार्थानुष्ठाने ऽधिकृताः कर्तारस्त एव स्मृत्यर्थानुष्ठाने, आचमनादिस्मार्तपदार्थसंवलितवेदिस्तरणादिवैदिकपदार्थप्रयोगदर्शनात्। न त्वेवमेकाधिकारावगमो बाह्यस्मृतिषु विद्यते। तस्मान् मन्वादिस्मृ-

---

**7** अपि वा ··· स्यात् ] *Jaiminisūtra* 1.3.2

**10** आचमनादि° ] *Śābarabhāṣya* ad 1.3.5 (A 196.3–5): "आचान्तेन कर्तव्यम्" "यज्ञोपवीतिना कर्तव्यम्" "दक्षिणाचारेण कर्तव्यम्" इत्येवंलक्षणान्युदाहरणानि। किमेतानि श्रुतिविरुद्धानि न कर्तव्यानि, उताविरुद्धानि कार्याणीति चेत्; *Nyāyamañjarīgranthibhaṅga* 109.10–11: आचमनादिस्मार्तपदार्थेति। "आचान्तेन कर्तव्यम्" "शुचिना कर्तव्यम्" इति स्मार्तपदार्थमिश्राणां वेदिस्तरणादीनां दर्शनात्।

**10** वेदिस्तरणादि° ] *Śābarabhāṣya* ad 1.3.6 (*pūrvapakṣa*, A 197.3–5): "वेदं कृत्वा वेदिं कुर्वीत" इतीमां श्रुतिमुपरुन्ध्याद् अन्तरा वेदं वेदिं चानुष्ठीयमानमाचमनादि।

---

**1** °मूलत्व° ] $K_1$; °मूलकत्व° $MVA_1B_1$ **2** वेदस्या° ] $MVA_1K_1$; वेदस्य वेदस्या° $B_1$ **4** प्रामाण्ये ] $MVB_1K_1$; प्रमाण्ये $A_1$ **5** प्रवादुकाः ] $MA_1K_1$; प्रावादुकाः $VB_1$ **5** प्रतिवक्तव्याः ] $MVA_1$; प्रतिवक्तव्यः $B_1$; विप्रतिपत्तव्याः $K_1$ **7** अपि वा ] $MVB_1K_1$; अवापि $A_1$ **7** °सामान्यात् ] $MVK_1$; °सामर्थ्यात् $A_1B_1$ **9** कर्तार° ] $MVB_1K_1$; कतार° $A_1$ **9** °ष्ठाने ] $MVA_1B_1$; °ष्ठाने च $K_1$ **10** °नादिस्मार्त° ] $MVK_1$; °नादिः सार्थ° $A_1$; °नादिस्मार्थ° $B_1$ **10** °वलित° ] $VK_1$; °वलितयैव M; °वलिता° $A_1B_1$ **11** न त्वेव° ] $MVA_1B_1K_1$; नन्वेव° $M^{ka}$

तय एव प्रमाणम्, न बाह्यस्मृतयः।

[2.2 आप्तोक्तत्वादिति नैयायिकाः]

ननु मन्वादिस्मृतयो ऽपि वेदमूलत्वात्प्रमाणं नान्यत इति।

[2.2.1 योगिप्रत्यक्षं धर्मग्राहकम्]

अत्रोच्यते। तदेतद् वेदमूलतया प्रामाण्यं योगिप्रत्यक्षं धर्मग्राहकममृष्यमाणाः किलाचक्षते भवन्तः। एतच्च न युक्तम्। यथा हि भगवानीश्वरः सर्वस्य कर्ता सर्वस्येशिता सर्वदर्शी सर्वानुकम्पी च वेदानां प्रणेता समर्थितः, तथा योगिप्रत्यक्षमपि धर्मग्रहणनिपुणमस्मदादिप्रत्यक्षविलक्षणं प्रत्यक्षलक्षणे समर्थितमेव। तस्मात् तन्मूला एव मन्वादिदेशना भवन्तु।

[2.2.2 त्रिकालानवच्छेदसमर्थनम्]

यत्तु त्रिकालानवच्छिन्नः कथं प्रत्यक्षगम्यो धर्मः स्यादिति चोदनैव तत्र प्रमाणमुच्यते, प्रतिविहितं तदीश्वरप्रत्यक्षसमर्थनेनैव। सा-

---

**9** प्रत्यक्षलक्षणे ] *Nyāyamañjarī* I 271.8–9: अग्निहोत्रादिक्रियाणां स्वर्गादिफलतां ज्ञास्यन्ति योगिन इति किमत्र साहसम्।

**13** °मुच्यते ] See the second reason in section 2.1.1; cf. *Nyāyamañjarī* I 271.4–5: यच्च त्रिकालानवच्छिन्नो यजेतेत्यादिलिङादियुक्तशब्दैकशरणावगमो धर्मः कथं ततो ऽन्येन प्रमाणेन परिच्छिद्यतामित्युच्यते।

**13** ईश्वरप्रत्यक्षसमर्थनेनैव ] *Nyāyamañjarī* I 505.2–17: पुंसामसर्ववित्त्वं हि रागादिमलबन्धनम्। न च रागादिभिः स्पृष्टो भगवानिति सर्ववित्॥ ··· एवं च तदतीतानागतसूक्ष्मव्यवहितादिसमस्तवस्तुविषयम्, न भिन्नम्।

---

**6** यथा ] $MVA_1B_1$; तथा $K_1$　**8** °णनिपुण° ] $K_1$; °णे निपुण° $MVA_1B_1$　**9** °विलक्षणं ] $MVA_1B_1$; °लक्षणं $K_1$　**9** प्रत्यक्षलक्षणे ] $MVA_1B_1$; प्रत्यक्षलक्षण° $K_1$　**12** यत्तु ] $MVA_1K_1$; यत्त् $B_1$　**13** चोदनैव ] $MVB_1K_1$; चोदनेव $A_1$　**13** °प्रत्यक्ष° ] $MA_1B_1K_1$; °प्रत्यक्षं V　**13** °समर्थनेनैव ] $B_1K_1$; °समर्थनेन $MA_1$; om. V

ध्यसाधनसंबन्धस्य स्वर्गाग्निहोत्रादिगतस्य यथा ग्राहकम् ईश्वरप्रत्यक्षम्, एवमष्टकादियागगतस्य ग्राहकं मन्वादिप्रत्यक्षं भविष्यति — इति किमत्र त्रिकालानवच्छेदेन तदवच्छेदेन वा कृत्यम्।

## [2.2.3 श्रुतिस्मृतिविभागः]

यद्येवमष्टकादिकर्मणां धर्मत्वाग्रहणादसर्वज्ञ ईश्वरः स्यात्। ज्ञात्वा वाऽनुपदिशन्नकारुणिको भवेत्।

नैष दोषः। सर्वं जानात्येव भगवान्। किंचित्स्वयमुपदिशति, किंचित् परानुपदेशयति। ते हि तस्यानुग्राह्या भगवतः, तेषां च तदनुग्रहकृतैव तथाविधज्ञानप्राप्तिः। मन्वादीनां प्रत्यक्षो धर्म इति वेदे ऽपि पठ्यते। "साक्षात्कृतधर्माण ऋषयो बभूवुः। ते ऽपरेभ्यो

---

**3** किमत्र ⋯ कृत्यम् ] Cf. *Nyāyamañjarī* I 271.6: किमिव हि त्रिकालस्पर्शास्पर्शाभ्यां कृत्यम्।

**10** वेदे ऽपि पठ्यते ] *Nyāyamañjarīgranthibhaṅga* 109.12–15: उपदेशेन मन्त्रान् संप्रादुः। उपदेशेन शिष्योपाध्यायिकया अपरेभ्यो ऽवरकालीनेभ्यः शक्तिहीनेभ्यो मन्त्रान् ग्रन्थतो ऽर्थतश्च संप्रादुः संप्रत्तवन्तः। अर्थतश्च मन्त्राणां ज्ञानाद् धर्मो ऽपि ज्ञातो भवति, कर्मणां विशिष्टफलप्रदत्वस्य मन्त्रैः प्रकाशनादिति।

---

**1** साध्यसाधनसंबन्धस्य स्वर्गाग्निहोत्रादिगतस्य यथा ग्राहकम् ईश्वरप्रत्यक्षम् ] $MB_1$; यथा ऽग्निहोत्रादेर्धर्मत्वस्य ग्राहकम् V; साध्यसाधनसंबन्धस्य स्वर्गाग्निहोत्रादिगतस्य ×दितिचोदन× यथा ग्राहकम् ईश्वरप्रत्यक्षम् $A_1$; साध्यसाधनसंबन्धस्य हि स्वर्गाग्निहोत्रादिगतस्य यथा ग्राहकम् ईश्वरप्रत्यक्षम् $K_1$ **2** °ष्टकादियाग° ] $A_1B_1K_1$; °ष्टकादि° M; °ष्टकादियागे V **2** °गतस्य ] $A_1B_1K_1$; °गतस्य तस्य M; तस्य V **3** त्रिकालानवच्छेदेन तदवच्छेदेन वा कृत्यम् ] V $A_1$; त्रिकालानवच्छेदेनावच्छेदेन वा कृत्यम् M; त्रिकालानवच्छेदेन तदवच्छेदेन वाक्यत्वम् $B_1$; त्रिकालानवच्छेदेन कृत्यं $K_1$ **5** °ग्रहणा° ] $MK_1$; °ग्राहित्वा° V; °ग्रहणत्वा° $A_1B_1$ **7** किंचित्स्व° ] $MVA_1B_1$; किञ्चित्तु स्व° $K_1$ **8** परानुपदेशयति ] $MVA_1B_1$; परानुपदिशति किञ्चित् परानुपदेशयति $K_1$ **9** तदनु° ] $MVA_1B_1$; तानु° $K_1$ **9** मन्वादीनां ] $MVA_1B_1$; मन्वादीनाञ्च $K_1$ **10** वेदे ऽपि पठ्यते ⋯ इति ] $K_1$; वेदे पि पठ्यते ⋯ इति वेदे पि पठ्यते $M^{back}VA_1B_1$; वेदे ऽपि पठ्यते M **10** °धर्माण ] $VA_1B_1$; °धर्माणो $K_1$

ऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुः" इति।

## [2.2.4 श्रुतिस्मृतिविरोधः]

नन्वेवं प्रत्यक्षमूलत्वाविशेषाच् छ्रुतिस्मृत्योर्विरोधे विकल्पः प्राप्नोति बृहद्रथन्तरविध्योरिव, न बाध्यबाधकभावः। न हीश्वरप्रत्यक्षस्य योगिप्रत्यक्षस्य च प्रामाण्ये कश्चिद्विशेषः। नैसर्गिकाहार्यत्वकृतस्तु भविष्यति, किं तेन।

उच्यते। भवतु विकल्पः, को दोषः। वेदमूलत्ववादिभिरपि कश्चिद्विकल्पो व्याख्यात एव। विषयविभागेन वा विकल्पो व्याख्या-

---

1 साक्षात्कृत° ⋯ संप्रादुः ] *Nirukta* 1.20 (ऽवरे° instead of ऽपरे°); *Vākyapadīya svavṛtti* ad v. 5 (Iyer 24.5–6).

4 बृहद्रथन्तरविध्योरिव ] *Nyāyamañjarīgranthibhaṅga* 109.16: बृहद्रथन्तरविध्योरिव "बृहत्पृष्ठं भवति" "रथन्तरं पृष्ठं भवति" इत्यनयोः।

6 नैसर्गिकाहार्यत्वकृतस्तु ] Cf. *Āgamaḍambara* 90.10–11: एष एव विशेषो हि योगिनां परमेश्वरात्। तस्य नैसर्गिकं ज्ञानं ध्यानयोगेन योगिनाम्॥

8 व्याख्यात एव ] *Tantravārttika* ad 1.3.4 (A 188.13ff); *Nyāyamañjarīgranthibhaṅga* 109.16–22: वेदमूलत्ववादिभिरपि कैश्चिद् विकल्पो व्याख्यात एवेति। अयं तेषामाशयः। किल भवद्भिः प्रत्यक्षया श्रुत्यानुमानिकी श्रुतिर्बाध्यत इत्यभिधीयते। तत्र ब्रूमः। सा श्रुतिर्मन्वादीनां प्रत्यक्षाऽप्रत्यक्षा वा। न तावदप्रत्यक्षा, मन्वादीनामाप्तत्वहानेः। एवं चातिविरोधे ऽप्यप्रामाण्यप्रसक्तिः। अथ प्रत्यक्षा, तदानीमिदानीन्तनप्रत्यक्षत्वं क्षोपयुज्यते। तेषां प्रत्यक्षत्वेन तस्याः प्रामाण्यसिद्धेः प्रामाण्यं चेत्, बृहद्रथन्तरश्रुत्योरिव विरोधे विकल्पः केन वार्यत इत्यादि।

8 विषयविभागेन ] *Tantravārttika* ad 1.3.4 (A 192.17): एवं विषयनानात्वाद-

---

1 °भ्यो ऽसा° ] $VA_1B_1$; °भ्योस्सा° $K_1$　1 संप्रादुः ] $VA_1B_1$; प्रादुः $K_1$　3 नन्वेवं ] $MVA_1K_1$; नन्वेव $B_1$　3 °त्योर्विरोधे ] $MVB_1K_1$; °त्यविरोध° $A_1$　4 न बाध्य° ] $MVB_1K_1$; बाध्य° $A_1$　5 योगिप्रत्यक्षस्य ] $MVK_1$; योगिप्रत्यक्ष×मूलत्वाविशे×स्य $A_1$; om. $B_1$　5 °हार्यत्व° ] $VA_1B_1K_1$; °हार्य° M　7 भवतु ] $MVA_1B_1$; भवितु $K_1$　7 वेदमूल° ] $MVB_1K_1$; वदमूल° $A_1$　8 व्याख्यात एव ⋯ वा विकल्पो ] $MVA_1K_1$; om. $B_1$(eyeskip)

स्यते। न च श्रुतिस्मृतिविरोधोदाहरणं किंचिदस्तीति स्वाध्यायाभियुक्ताः। तस्मादाप्तप्रत्यक्षमूलत्वेन वेदानामिव धर्मशास्त्राणां प्रामाण्यम्।

## [3 इतिहासपुराणप्रामाण्यम्]

### [3.1 नैयायिकमतम्]

एतेनेतिहासपुराणप्रामाण्यमपि निर्णीतं वेदितव्यम्। इतिहासपुराणं हि पञ्चमं वेदमाहुः। उक्तं च —

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति॥

इति।

---

विरोधादबाधनम्; *Nyāyamañjarīgranthibhaṅga* 109.22–26: विषयविभागेन वा विकल्पो व्याख्यास्यत इति यथा — प्राजापत्यां तु कृत्वेष्टिं सर्ववेदसदक्षिणाम्। आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात्॥ इति सप्तमाद्यो प्राभाकरटीकातात्पर्यम्।

1 न च श्रुतिस्मृतिविरोधो° ] *Tantravārttika* ad 1.3.4 (A 193.11–12): तेन नैव श्रुतिस्मृत्योर्विरोधो ऽतीव दृश्यते। श्रुत्योरेव ह्यसौ दृष्टः क्वचिद्वा नैव विद्यते॥ *Nyāyamañjarīgranthibhaṅga* 109.29–110.1: न च श्रुतिस्मृतिविरोधोदाहरणमिति। "प्राजापत्यं शतकृष्णलं चरुं निर्वपेदायुष्कामः" इत्यादौ कार्यस्य कृष्णलताप्रतिपादकानि तानि परस्परविरुद्धश्रुत्युदाहरणान्येवेति भट्ट आचष्टे।

8 इतिहासपुराणाभ्यां ··· प्रतरिष्यति ] *Mahābhārata* 1.1.204; *Nyāyamañjarī* I 6.4–5

---

1 °दाहरणं ] $MVA_1K_1$; °दाहरण $B_1$ 2 वेदानामिव ] $MVA_1K_1$; वेदनामिव $B_1$ 2 °शास्त्राणां ] $VA_1B_1K_1$; °शास्त्राणामपि M 3 प्रामाण्यम् ··· इतिहासपुराणं ] $MA_1B_1K_1$; om. V 8 °क्तं च — इतिहा° ] $MVA_1B_1$; +++++ $K_1$ 8 वेदं ] $MVA_1K_1$; वेद $B_1$ 8 समुपबृंहयेत् ] $MVB_1K_1$; सुमुपवृंहयेत् $A_1$ 9 मामयं ] $MVK_1$; ममायं $A_1B_1$

[3.2 मीमांसकमताभ्युपगमः]

अथवा किमस्माकं दुरभिनिवेशेन। वेदमूलत्वात्स्मृतीनां स्मृतिवत्पुराणानामपि भवतु प्रामाण्यम्। प्रामाण्ये तावदविवादः। सदाचारस्याप्यनुपनिबद्धस्य वेदमूलत्वादेव भवतु प्रामाण्यम्।

[4 चतुर्दशविद्यास्थानप्रामाण्यम्]

सर्वथा तावद् वेदाश्चत्वारः पुराणं स्मृतिरिति षडिमानि विद्यास्थानानि साक्षात्पुरुषार्थसाधनोपदेशीनि पूर्वोक्तनीत्या प्रमाणम्।

---

**4** सदाचारस्याप्यनुपनिबद्धस्य ] *Nyāyamañjarīgranthibhaṅga* 110.6: सदाचारस्याप्यनिबद्धस्य विवाहे कङ्कणबन्धनादेः।

**6** वेदाश्चत्वारः ] *Nyāyamañjarī* I 5.5–7: तत्र वेदाश्चत्वारः। ··· एते चत्वारो वेदाः साक्षादेव पुरुषार्थसाधनोपदेशस्वभावाः।

**6** पुराणं ] *Nyāyamañjarī* I 6.2–7: इतिहासपुराणाभ्यामप्युपाख्यानादिवर्णनेन वैदिक एवार्थः प्रायः प्रतन्यते। ··· तदेवं वेदपुराणधर्मशास्त्राणां स्वत एव पुरुषार्थसाधनोपदेशस्वभावत्वाद्विद्यास्थानत्वम्।

**6** स्मृति° ] *Nyāyamañjarī* I 5.10–11: स्मृतिशास्त्रमपि मन्वाद्युपनिबद्धम् अष्टकाशिखाकर्मप्रपाप्रवर्तनादिपुरुषार्थसाधनोपदेश्येव दृश्यते।

---

**2** °कं दुरभि° ] MVA$_1$B$_1$; °कमभि° K$_1$　**3** °राणानामपि ] MVB$_1$; °राणामपि A$_1$; °राणमपि K$_1$　**3** भवतु प्रामाण्यम्। प्रा° ··· प्रामाण्यम् ] MA$_1$B$_1$; भवतु प्रामाण्यम् V(eyeskip); भवितु प्रमाण++ ··· प्रामाण्यम् K$_1$　**4** °पनिबद्धस्य वेद° ] MA$_1$B$_1$; +++++++ K$_1$　**6** पुराणं ] MVB$_1$; पुराण A$_1$; पुराणानि K$_1$　**6** स्मृतिरिति ] MVA$_1$B$_1$; स्मृतय इति K$_1$　**7** साक्षात्पु° ] MV K$_1$; साक्षात्कृतपु° M$^{ka}$A$_1$B$_1$　**7** पूर्वोक्तनीत्या प्रमाणम् ] A$_1$B$_1$; पूर्वोक्तरीत्या प्रमाणम् M; om. V; पूर्वोक्तनीत्या प्र+++ K$_1$

व्याकरणादीनि तु षडङ्गान्यङ्गत्वेनैव तदुपयोगीनि, न साक्षाद्धर्मोपदेशीनि। कल्पसूत्रेष्वपि विक्षिप्तकर्मक्रमनियमसंग्रहमात्रम्, नापूर्वोपदेशः। मीमांसा वेदवाक्यार्थविचारात्मिका। वेदप्रामाण्यनिश्चयहेतुश्च न्यायविस्तर इत्यामुख एवोक्तम्। तदिमानि चतुर्दश विद्यास्थानानि प्रमाणम्, कानिचित् साक्षादुपदेशीनि कानिचित् तदुपयोगीनि

1 व्याकरणादीनि ] *Nyāyamañjarī* I 6.9–11: अङ्गानि व्याकरणकल्पज्योतिश्शिक्षाछन्दोनिरुक्तानि वेदार्थोपयोगिपदादिव्युत्पादनद्वारेण विद्यास्थानत्वं प्रतिपद्यन्ते। तेषामङ्गसमाख्यैव तदनुगामितां प्रकटयति; *Tantravārttika* ad 1.3.2 (A 167.9): व्याकरणे ऽपि शब्दापशब्दविभागज्ञानं साक्षाद्व्रीह्यादिविभागवत् प्रत्यक्षनिमित्तम्। साधुशब्दप्रयोगात्फलसिद्धिर् अपशब्देन तु फलवैगुण्यं भवतीति वैदिकम्।

3 मीमांसा ] *Nyāyamañjarī* I 6.13–14: विचारमन्तरेणाव्यवस्थितवेदवाक्यार्थानवधारणान् मीमांसा वेदवाक्यार्थविचारात्मिका; *Tantravārttika* ad 1.3.2 (A 167.20–29): विषयो वेदवाक्यानां पदार्थैः प्रतिपाद्यते। ते च जात्यादिभेदेन संकीर्णा लोकवर्त्मनि॥ स्वलक्षणविविक्तैस्तैः प्रत्यक्षादिभिरञ्जसा। परीक्षकार्पितैः शक्याः प्रविवेक्तुं न तु स्वतः॥ वेदो ऽपि विप्रकीर्णात्माप्रत्यक्षाद्यवधारितः। स्वार्थं साधयतीत्येवं ज्ञेयास्ते न्यायविस्तरात्॥ तथा च मानवे ऽप्यभिहितम् प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥ तथा — यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः॥ इत्यादिभिस्तर्कविशुद्धिराश्रिता।

4 न्यायविस्तर ] *Nyāyamañjarī* I 7.7–8: न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानाम्, वेदप्रामाण्यरक्षाहेतुत्वात्।

4 इत्यामुख एवोक्तम् ] *Nyāyamañjarī* I 5.5–7.14

5 चतुर्दश विद्यास्थानानि ] *Nyāyamañjarī* I 7.16–8.6: विद्यास्थानत्वं नाम चतुर्दशानां शास्त्राणां पुरुषार्थसाधनज्ञानोपायत्वमेवोच्यते। ··· तच्च पुरुषार्थसाधनपरिज्ञानोपायत्वं कस्यचित् साक्षात् कस्यचिदुपायद्वारेण। तानीमानि चतुर्दश

1 तु ] $MA_1B_1K_1$; om. V 1 षडङ्गान्यङ्गत्वेनैव तदुपयोगीनि ] $MVB_1$; षडङ्गानि $A_1$; षडंगान्यंगत्वेनैव त्वदुपयोगीनि $K_1$ 1 न ] $MVA_1B_1$; om. $K_1$ 3 नापूर्वो° ] $MVA_1K_1$; नपूर्वो° $B_1$ 3 °वाक्यार्थ° ] $VB_1K_1$; °वाक्य° M; °वाक्या° $A_1$ 4 °त्यामुख एवो° ] $MVA_1B_1$; +मुखत एवो° $K_1$ 5 प्रमाणम् ] $MVA_1B_1$; प्रामाण्यं $K_1^{ac}$; प्रामाणं $K_1^{pc}$ 5 साक्षादुपदेशीनि ] $MVA_1B_1$; साक्षाद्धर्मोपदेशीनि $K_1$

— इति सिद्धम् ।

## [5 चतुर्दशविद्यास्थानान्यागमप्रामाण्यम् ]

यानि पुनरागमान्तराणि परिदृश्यन्ते, तान्यपि द्विविधानि। कानिचित् सर्वात्मना वेदविरोधेनैव वर्तन्ते बौद्धादिवत् । कानिचित् तदविरोधेनैव वैकल्पिकव्रतान्तरोपदेशीनि शैवादिवत् ।

### [5.1 वेदाविरोध्यागमान्तराणि ]

#### [5.1.1 शैवागमप्रामाण्यम् ]

तत्र शैवाद्यागमानां तावत्प्रामाण्यं ब्रूमहे। तदुपजनितायाः प्रतीतेः सन्देहबाधकारणकालुष्यकलापस्यानुपलम्भात् । ईश्वरकर्तृत्वस्य तत्रापि स्मृत्यनुमानाभ्यां सिद्धत्वात्, मूलान्तरस्य लोभमोहादेः कल्पयितुमशक्यत्वात् । न हि तत्रेदंप्रथमता स्मर्यते, वेदवद् एकदेशसंवादाश्च भूम्ना दृश्यन्ते — इति कुतो मूलान्तरकल्पनावकाशः।

न च वेदप्रतिपक्षतया तेषामवस्थानम्, वेदप्रसिद्धचातुर्वर्ण्यादिव्यवहारापरित्यागात् ।

---

विद्यास्थानानीत्याचक्षते। यथोक्तम् — पुराणतर्कमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ (*Yājñavalkyasmṛti* 1.3: °न्याय° instead of °तर्क° ) इति।

**5** कानिचित् ] *Nyāyamañjarīgranthibhaṅga* 110.8–9: कानिचित् तदविरोधेनेति। न हि शैवादौ वैदिकानुष्ठाननिन्दाद्वारेण स्वकीयचरीयानुष्ठानप्रशंसा।

**14** वेदप्रसिद्ध° ··· °परित्यागात् ] Cf. *Āgamaḍambara* 75.14–17: शैवादयस्तु

---

**4** वर्तन्ते ] $A_1B_1K_1$; प्रवर्तन्ते MV **5** वैकल्पिक° ] $A_1K_1$; कल्पित° MV; कल्पिक° $B_1$ **8** शैवाद्याग° ] $VA_1B_1K_1$; शैवाग° M **8** °त्प्रामाण्यं ] $MVB_1K_1$; °त्प्रमाण्यं $A_1$ **9** प्रतीतेः ] $MVA_1B_1$; प्रतीतोः $K_1$ **9** °ष्यकलापस्या° ] $MVA_1B_1$; °ष्या° $K_1$ **10** मूलान्तरस्य लोभ° ] $MVA_1B_1$; मूलतान्तरलोभ° $K_1^{ac}$; मूलान्तरलोभ° $K_1^{pc}$ **12** °संवादाश्च ] $MVA_1K_1$; °संवेदाच्च $B_1$ **13** °प्रतिपक्षतया ] $MVA_1K_1$; °प्रतिपक्ष $B_1$ **13** °मवस्थानम् ] $MVA_1$; °मवस्थाने $B_1$; °मसंस्था $K_1$ **13** वेद° ] $MVA_1B_1$; om. $K_1$

मन्वादिचोदनान्यायः स यद्यपि न विद्यते।
शैवागमे, तथाऽप्यस्य न न युक्ता प्रमाणता॥
सर्वोपनिषदामर्था निःश्रेयसपदस्पृशः।
विविच्यमाना दृश्यन्ते ते हि तत्र पदे पदे॥
ये च वेदविदामग्र्याः कृष्णद्वैपायनादयः।
प्रमाणमनुमन्यन्ते ते ऽपि शैवादिदर्शनम्॥

## [5.1.2 पञ्चरात्रप्रामाण्यम्]

पञ्चरात्रे ऽपि तेनैव प्रामाण्यमुपवर्णितम्।
अप्रामाण्यनिमित्तं हि नास्ति तत्रापि किंचन॥

## [5.1.3 उभयागमसमन्वयः]

तत्र च भगवान् विष्णुः प्रणेता कथ्यते। स चेश्वर एव।
एकस्य कस्यचिदशेषजगत्प्रसूति-

---

न चातुर्वर्ण्यमध्यपतिताः श्रुतिस्मृतिविहितमाश्रममवजहतः शासनान्तरपरिग्रहेणान्यथा वर्तन्ते। एते पुनः "आ जन्मन आ सन्ततेर्ब्राह्मणा एव वयम्" इति ब्रुवाणास्तथैव चातुराश्रम्यमनुकुर्वन्तीति महद्दुःखम्।

**5** ये च ] *Nyāyamañjarīgranthibhaṅga* 112.26–28: ये ऽपि वेदविदामग्र्या इति। तथा हि भारते — पञ्चरात्रं च साङ्ख्यं च वेदाः पाशुपतं तथा। ज्ञानान्येतानि राजेन्द्र विद्धि नाना मतानि च॥ (*Mahābhārata* 12.337.59) इति।

**8** पञ्चरात्रे ] Cf. *Āgamaḍambara* 75.11–14: यदमी पाञ्चरात्रिका भागवता ब्राह्मणवद्भवहरन्ति। ब्राह्मणसमाजमध्यमनुप्रविश्य निर्विशङ्कम् "अभिवादये" इति जल्पन्ते। विशिष्टस्वरवर्णानुपूर्वीकतया वेदपाठमनुसरन्त इव पञ्चरात्रग्रन्थमधीयते। "ब्राह्मणाः स्मः" इत्यात्मानं व्यपदिशन्ति व्यपदेशयन्ति च।

**12** एकस्य ··· प्रतीतिः॥ *Āgamaḍambara* 86.18–21: एकस्य ··· प्रसिद्धिः॥ cf.

---

**2** न न ] $MA_1B_1K_1$; ननु V **3** सर्वोप° ] $MVA_1B_1$; ये चोप° $K_1$ **5** °नादयः ] $MVA_1B_1$; °नादयनादयः $K_1$ **6** °दर्शनम् ] $MVB_1K_1$; °दर्शनात् $M^{ka}A_1$ **8** तेनैव ] $MVA_1B_1$; तैरेव $K_1$ **11** भगवान् ] $MVB_1K_1$; भववान् $A_1$

हेतोरनादिपुरुषस्य महाविभूतेः।
सृष्टिस्थितिप्रलयकार्यविभागयोगाद्
ब्रह्मेति विष्णुरिति रुद्र इति प्रतीतिः॥

वेदे च पदे पदे "एक एव रुद्रो ऽवतस्थे, न द्वितीयः" इति "इदं विष्णुर्विचक्रमे" इति रुद्रो विष्णुश्च पठ्यते। तद्योगाश्च तदाराधनोपाया वेदे ऽपि चोदिता एव। शैवपञ्चरात्रयोस्तु तद्योगा एवान्यथोपदिश्यन्ते। न चैष वेदविरोधः, वैकल्पिकत्वादुपायानाम्। अत आप्तप्रणीतत्वाद् वेदाविरुद्धत्वाच्च न तयोरप्रामाण्यम्॥

## [5.2 वेदविरोध्यागमान्तराणि]

ये तु सौगतसंसारमोचकागमाः पापकाचारोपदेशिनः कस्तेषु प्रामाण्यमार्यो ऽनुमोदते।

### [5.2.1 बौद्धागमाप्रामाण्यम्]

बुद्धशास्त्रे हि विस्पष्टा दृश्यते वेदबाह्यता।

---

*Viṣṇupurāṇa* 1.2.63: सृष्टिस्थित्यन्तकरणाद् ब्रह्मविष्णुशिवात्मिकाम्। स संज्ञां याति भगवानेक एव जनार्दनः।

**4** एक एव ··· द्वितीयः ] Source unknown (=*Nirukta* 1.15)

**5** इदं विष्णुर्विचक्रमे ] *Ṛgveda* 1.22.17

**13** बुद्ध° ··· °वधारणात्॥ Cf. *Tantravārttika* ad 1.3.4 (A 195.6–8): शाक्यादिवचनानि तु कतिपयदमदानादिवचनवर्जं सर्वाण्येव समस्तचतुर्दशविद्यास्थानवि-

---

**1** °हेतोर° ] MVB$_1$K$_1$; °हेतुर° A$_1$ **3** विष्णुरिति ] MVB$_1$K$_1$; विष्णु इति A$_1$ **4** वेदे च ] MVA$_1$B$_1$; वेदे K$_1$ **4** रुद्रो ] MVB$_1$K$_1$; रुद्रो न चोपलक्षणं किंचिदस्ति रुद्रो A$_1$ **4** द्वितीयः" इति ] VA$_1$B$_1$K$_1$; द्वितीयः M **5** तद्योगाश्च ] MA$_1$B$_1$; तद्योगाच्च V; तद्यागाश्च K$_1$ **6** °पञ्च° ] MVK$_1$; °पांच° A$_1$B$_1$ **6** तद्योगा ] MVA$_1$B$_1$; तद्यागा K$_1$ **7** चैष ] VA$_1^{pc}$B$_1$K$_1$; चैष एव M; चैषा A$_1^{ac}$ **10** °मोचका° ] MVA$_1$B$_1$; °मोचकाद्या° K$_1$ **10** पापका° ] MVA$_1$B$_1$; पापा° K$_1$ **10** कस्तेषु ] MVA$_1$B$_1$; कस्तेषां K$_1$ **11** प्रामाण्य° ] MVB$_1$K$_1$; प्रमाण्य° A$_1$ **11** ऽनुमोदते ] MVB$_1$K$_1$; नमोदते A$_1$

जातिधर्मोचिताचारपरिहारावधारणात्॥

## [5.2.2 संसारमोचकागमाप्रामाण्यम्]

संसारमोचकाः पापाः प्राणिहिंसापरायणाः।
मोहप्रवृत्ता एवेति न प्रमाणं तदागमः॥
निषिद्धसेवनप्रायं यत्र कर्मोपदिश्यते।
प्रामाण्यकथने तस्य कस्य जिह्वा प्रवर्तते॥
ततो यद्यपि सिद्धिः स्यात् कदाचित् कस्यचित् क्वचित्।
ब्रह्महत्यार्जितग्राम्यभोगवन् नरकाय सा॥
निषिद्धाचरणोपात्तं दुष्कृतं केन शाम्यति।
अतः कालान्तरेणापि नरके पतनं पुनः॥

## [5.2.3 महाजनप्रसिद्धित एवाप्तोक्तत्वसिद्धिः]

### [5.2.3.1 महाजनानुमत्यननुमती]

यत्त्वत्र चोदितम् — परेषु पूर्वोक्तक्रमेण बुद्ध्याप्तकल्पनां कुर्वत्सु

---

रुद्धानि त्रयीमार्गव्युत्थितविरुद्धाचरणैश्च बुद्धादिभिः प्रणीतानि; (A 195.18–19): तदनुशिष्टानुसारिणश्च सर्व एव श्रुतिस्मृतिविहितधर्मातिक्रमेण व्यवहरन्तो विरुद्धाचारत्वेन ज्ञायन्ते।

**3** संसारमोचकाः ] *Nyāyamañjarīgranthibhaṅga* 113.11: संसारमोचका इति। ये धूकचटकन्यायेन प्राणिवधं धर्ममिच्छन्ति।

**5** निषिद्धसेवनप्रायं ] *Nyāyamañjarīgranthibhaṅga* 113.12–14: निषिद्धसेवनप्रायमिति। यदुक्तम् — विस्रधारा मृतं चैव मेदो रुधिरमेव च। पवित्रं भैरवे तन्त्रे साधकानां न संशयः॥ इति।

**7** ततो यद्यपि सिद्धिः स्यात् ] *Nyāyamañjarīgranthibhaṅga* 113.15: ततो यद्यपि सिद्धिः स्यादाकाशगमनादिका।

**13** चोदितम् ] See the second śloka, pāda ab, in section 1.

---

**6** तस्य ] $MVA_1B_1$; तत्र $K_1$ **7** कस्यचित् ] $MVB_1K_1$; om. $A_1$(unmetrical) **8** °त्यार्जित° ] $MVB_1K_1$; °त्यार्जत° $A_1$ **8** °ग्राम्य° ] $MVA_1B_1$; °ग्राम° $K_1$ **9** °त्तं दुष्कृतं ] $MVB_1K_1$; °तुंष्कृतं $A_1$(unmetrical) **10** अतः ] $MVA_1K_1$; अत $B_1$

किं प्रतिविधेयम् — इति, तत्रोच्यते। महाजनप्रसिद्धनुग्रहे हि सति सुवचमाप्तोक्तत्वं भवति, नान्यथा। महाजनश्च वेदानां वेदानुगामिनां च पुराणधर्मशास्त्राणां वेदाविरोधिनां च केषांचिदागमानां प्रामाण्यमनुमन्यते, न वेदविरुद्धानां बौद्धाद्यागमानाम् — इति कुतस्तेषामाप्तप्रणीतत्वम्। मूलान्तरं हि तत्र सुवचमज्ञानलोभादि — इत्येवमभिधाय वेदस्पर्धिनो बौद्धादयो निषेद्धव्याः।

## [5.2.3.2 महाजनप्रकारः]

आह —

को ऽयं महाजनो नाम किमाकारः किमास्पदः।
किंसंख्यः किंसमाचार इति व्याख्यातुमर्हसि॥

अपि च य एते बौद्धादयो बुद्धादीनाप्तान् स्वागमप्रामाण्यसिद्धये वदन्ति, ते महाजनमपि निजं तत्सिद्धये वन्दकादिकं वदेयुरेव। कस्तत्र प्रतीकारः।

उच्यते। चातुर्वर्ण्यं चातुराश्रम्यं च यदेतदार्यदेशप्रसिद्धम्, स महाजन उच्यते। आकारस्तु तस्य "कीदृशं पाणिपादम्, कीदृशं

---

**5** °लोभादि ] Cf. *Tantravārttika* ad 1.3.4 (A 195.27–28): लोभादिकारणं चात्र बह्वेवान्यत् प्रतीयते। यस्मिन्सन्निहिते दृष्टे नास्ति मूलान्तरानुमा॥

---

**1** प्रति° ] $MVA_1B_1$; om. $K_1$　**1** महाजन° ⋯ नान्यथा ] $MVB_1K_1$; om. $A_1$(eyeskip)　**3** वेदानु° ] $K_1$; वेदार्थानु° $MVA_1B_1$　**4** प्रामाण्य° ] $MVA_1K_1$; प्रामाणां प्रामाण्य° $B_1$　**5** सुवच° ] $MVB_1K_1$; सुवचन° $A_1$　**5** °ज्ञान° ] $MVK_1$; °ज्ञानं $A_1B_1$　**6** वेदस्पर्धिनो ] $MVB_1$; मर्हसि×अपि च बौद्धादयो बुद्धादीनाप्तान्स्वागमप्रामा×धिनो $A_1$; वेदस्य विरोधिनो $K_1$　**10** किंसमाचार ] $MVB_1K_1$; किंसंसार $A_1$(unmetrical)　**11** अपि च य एते ] $K_1$; अपि च $MVA_1B_1$　**11** °प्रामाण्य° ] $MVB_1K_1$; °प्राण्य° $A_1$　**12** महाजनमपि निजं ] $MVB_1K_1$; महाजन×उच्यते आकार×मपि निजं $A_1$　**12** वन्दकादिकं ] $MA_1B_1K_1$; वृन्दादिकं V　**14** चातुर्वर्ण्यं ] $MVB_1$; चतुर्वर्ण्यं $A_1$; चातुवर्ण्यं $K_1$　**15** कीदृशं ] $MVA_1B_1$; कीदृशः $K_1$　**15** पाणिपादम् ] $MVB_1K_1$; पाणिपादं कीदृशं पाणिपादं $A_1$

शिरोग्रीवं वा" "कियती तस्य संख्या" इति पुरुषलक्षणानि गणयितुं न जानीमः।

### [5.2.3.3 महाजनाप्रत्याख्येयत्वम्]

चातुर्वर्ण्यचातुराश्रम्यरूपश्चैष महाजनो वेदपथप्रवृत्त आगमान्तरवादिभिरप्रत्याख्येय एव। तथा चैते बौद्धादयो ऽपि दुरात्मानो वेदप्रामाण्यनियमिता एव चण्डालादिस्पर्शं परिहरन्ति। निरस्ते हि जातिवादावलेपे कश्चण्डालादिस्पर्शे दोषः। ये ऽप्यन्ये केचिदशुचिभक्षणागम्यागमनादि निर्विकल्पदीक्षाप्रकारमकार्यमनुतिष्ठन्ति, ते ऽपि चातुर्वर्ण्यादिमहाजनभीतास् तत्कर्म रहसि कुर्वन्ति, न प्रकाशम्। निर्विशङ्के हि तच्छास्त्रप्रत्यये किमिति चौर्यवत् तदर्थानुष्ठानम्। अत

---

7 निरस्ते हि जातिवादावलेपे ] *Nyāyamañjarīgranthibhaṅga* 113.16–114.1: निरस्ते हि जातिवादावलेप इति। ब्राह्मणो ऽस्मीति यो जातिवादस्तत्कृतो ऽवलेपो दर्पो जातिवादावलेपः। यदाह — वेदप्रामाण्यं जातिवादावलेपस् तीर्थे स्नानेच्छा कस्यचित् कर्तृवादः। संतापारम्भः पापहानाय चेति ध्वस्तप्रज्ञानां पञ्च लिङ्गानि जाड्ये॥ (*Pramāṇavārttikasvavṛtti* 173.13–16) इति।

7 ये ऽप्यन्ये केचिद° ] *Nyāyamañjarīgranthibhaṅga* 114.2–4: ये ऽप्यन्ये केचिद् इति। नाथवादादयः। यथाहुः — माता च भगिनी चैव तथान्या या स्वगोत्रजा। गम्याऽपरा त्वगम्येति नाथ एवं किलाब्रवीत्॥ इत्यादि।

---

1 कियती ] $MVB_1K_1$; कीयती $A_1$ 1 °लक्षणानि ] $VA_1B_1K_1$; °लक्षणादीनि M 2 गणयितुं ] MV; गणितुं $A_1B_1$; गणयितुञ्च वयन् $K_1$ 4 °पथ° ] M $A_1B_1K_1$; °प्रथ° V 5 बौद्धादयो ] $MVB_1K_1$; बौद्धयो $A_1$ 6 °नियमिता ] $MVB_1K_1$; °निपतिता $A_1$ 6 निरस्ते हि ] $MVA_1B_1$; निरस्ते $K_1$ 7 °वलेपे ] $MA_1K_1$; °वलेपे वा V; °वलोपे $B_1$ 7 कश्च° ] $MA_1B_1K_1$; क्व चा° V 7 °स्पर्शे ] $MVB_1K_1$; °स्पर्श $A_1$ 8 °गम्यागमनादि ] $MVA_1B_1$; °गम्यगमनादि $K_1$ 8 निर्विकल्प° ] $MVA_1B_1$; निर्विकल्पक° $K_1$ 9 चातुर्वर्ण्यादि° ] $VA_1B_1K_1$; चातुर्वर्ण्य° M 9 तत्कर्म ] $MA_1B_1K_1$; तन्तं V 9 रहसि कुर्वन्ति, न प्रकाशम् ] $MVA_1B_1$; कुर्वन्ति रहस्यं रहस्यप्रकाशन् $K_1$

एव न निजो महाजन उत्थापयितुं शक्यते वन्दकादिः। किं त्वयमेव चातुर्वर्ण्यादिमहाजनः।

### [5.2.3.4 महाजनेन परिहारः]

स चैष महाजनो वेदविरुद्धमागमं परिहरत्येव , नानुमोदते।

संसारमोचकं स्पृष्ट्वा शिष्टाः स्नान्ति सवाससः।
बौद्धैरपि सहैतेषां व्यवहारो न कश्चन॥
वेदधर्मानुवर्ती च प्रायेण सकलो जनः।
वेदबाह्यस्तु यः कश्चिदागमो वञ्चनैव सा॥

### [5.2.3.5 वेदरीत्यनुकरणम्]

ईदृशश्चायमनन्यसामान्यविभवो महाभागो वेदनामा ग्रन्थराशिः , यदन्ये बाह्यागमवादिन एवमेव स्पर्धन्ते। ते हि स्वागमप्रामाण्यमभिवदन्तो वेदरीत्याऽभिदधति। वेदे यथा तथा प्रवेष्टुमीहन्ते। वैदिकानर्थानन्तराऽन्तरा स्वागमेषु निबध्नन्ति। वेदस्पर्शपूतमिवात्मानं

4 परिहरत्येव ] Cf. *Tantravārttika* ad 1.3.4 (A 194.8): यान्येतानि त्रयीविद्भिर्न परिगृहीतानि ...

13 वैदिकानर्थानन्तराऽन्तरा ] *Nyāyamañjarīgranthibhaṅga* 114.5: वैदिकानर्थानन्तरान्तरेति। वैदिकान् भूतदयादीन्; *Tantravārttika* ad 1.3.4 (A 194.12–

1 अत एव ] $MVA_1B_1$; अत एव च $K_1$　1 वन्दकादिः ] $MA_1B_1$; वृन्दकादिः V; वन्दकादिभिः $K_1$　1 त्वयमेव ] $MVA_1B_1$; त्वयमेव सर्वानुमतञ् $K_1$　2 °दिमहा° ] $VA_1B_1K_1$; °दिर् महा° M　5 स्पृष्ट्वा ] $MVB_1K_1$; दृष्ट्वा $M^{back}A_1$　5 सवा° ] $MVA_1B_1$; ++ $K_1$　6 सहैते° ] $MVB_1K_1$; सहेते° $A_1$　6 व्यवहारो न कश्चन ] $MVA_1^{pc}B_1$; व्यवहारो मन कश्चन $A_1^{ac}$; व्यवहा+++++ $K_1$　7 प्रायेण ] $MVA_1K_1$; प्रायेन $B_1$　7 सकलो ] $MVA_1^{pc}B_1K_1$; सलोकलो $A_1^{ac}$　10 महाभागो ] $MVA_1B_1$; महाभोगो $K_1$　11 यदन्ये ] $MVA_1B_1$; यदन्ये पि $K_1$　11 बाह्या° ] $MVA_1B_1$; ++ $K_1$　11 एवमेव ] $MVA_1B_1$; एवनमेव $K_1$　11 स्पर्धन्ते। ते ] $MVB_1K_1$; स्पर्द्धते $A_1$　12 °मप्रामाण्यमभिवद° ] $MVA_1B_1$; ++++++++ $K_1$　13 °र्थानन्तराऽन्तरा ] $MVK_1$; °र्थानंतरां $A_1$; °र्थानंतरा $B_1$

मन्यन्ते। तेषामप्यन्तर्हृदये ज्वलत्येव वेदप्रामाण्यम्। अत एवंविधाया महाजनप्रसिद्धेरागमान्तरेष्वदर्शनान्न तेषामाप्तप्रणीतत्वम्।

## [5.2.3.6 न्यायशास्त्रावश्यकता]

आह —

महाजनप्रसिद्धैव वेदप्रामाण्यनिश्चयात्।
किमर्थः कण्ठशोषो ऽयमियानार्येण संश्रितः॥

वेदप्रामाण्यसिद्ध्यर्थं हीदं शास्त्रमारब्धमिति गीयते। वेदप्रामाण्यस्य च महाजनप्रसिद्धैव सिद्धत्वात् किं शास्त्रेण।

अलं क्षुद्रचोद्यैरीदृशैः।

महाजनप्रसिद्धिं हि केचिद् विस्रावयन्त्यपि।
अतस्तदुपघाताय शास्त्रमस्त्रं प्रयुज्यते॥

तस्मात्पूर्वोक्तानामेव प्रामाण्यमागमानाम्, न वेदबाह्यानाम् — इति स्थितम्॥

---

13): ··· अहिंसासत्यवचनदमदानदयादिश्रुतिस्मृतिसंवादिस्तोकार्थगन्धवासितजीविकाप्रायार्थान्तरोपदेशीनि ···

**10** केचिद् विस्रावयन्त्यपि ] *Nyāyamañjarīgranthibhaṅga* 114.6–7: केचिद् विस्रावयन्त्यपि। यथा प्रतिपादितम् "को ऽयं महाजनो नाम" इत्यादि।

**11** शास्त्रमस्त्रं ] Cf. *Nyāyamañjarī* II 602.7–8: तद्विधानघटने निरर्गलं जल्पमस्त्रमुपदिष्टवान् मुनिः।

---

**1** मन्यन्ते ] $MVB_1K_1$; मन्यते $A_1$ **1** °त्येव वेद° ] M; °तीव V; °त्योव $A_1$; °त्येव $B_1$; ++वेद° $K_1$ **5** °सिद्धैव ] $MVB_1K_1$; °सिद्धेव $A_1$ **6** किमर्थः ] $MVA_1B_1$; किमर्थं $K_1$ **7** °मिति गी° ] $MVA_1B_1$; +++ $K_1$ **7** °प्रामाण्यस्य ] $MVB_1K_1$; °प्राण्यस्य $A_1$ **8** °प्रसिद्धैव ] $MA_1B_1K_1$; °सिद्धैव V **10** °सिद्धिं ] $MA_1B_1K_1$; °सिद्धं V **11** अतस्त° ] $MVB_1K_1$; अत×गमानां न×स्त° $A_1$ **11** शास्त्रमस्त्रं ] $VA_1B_1K_1$; शास्त्रमन्त्रं M **12** प्रामाण्य° ] $MVA_1B_1$; प्रामा+ $K_1$ **13** स्थितम् ] $MVA_1B_1$; स्थितिं $K_1$

## [6 सर्वागमप्रामाण्यम्]

### [6.1 आप्तप्रणीतत्वात्]

अन्ये सर्वागमानां तु प्रामाण्यं प्रतिपेदिरे।
सर्वत्र बाधसन्देहरहितप्रत्ययोदयात् ॥
सर्वत्र वेदवत् कर्तुराप्तस्य परिकल्पनात्।
दृष्टार्थेष्वेकदेशेषु प्रायः संवाददर्शनात्॥

#### [6.1.1 परस्परविरोधपरिहारः]

यत्पुनरत्रोक्तम् — सर्व एवागमाः परस्परविरुद्धार्थोपदेशित्वादप्रमाणं स्युः — इति।

##### [6.1.1.1 विरोधो न दोषाय]

तत्रोच्यते। आप्तप्रणीतत्वेन तुल्यकक्ष्यत्वादन्यतमदौर्बल्यनिमित्तानुपलम्भाच्च न कश्चिदागमः कंचिद् बाधते। विरोधमात्रं त्वकिंचित्करम्, प्रमाणत्वाभिमतेषु वेदवाक्येष्वपि परस्परविरोधदर्श-

---

**3** अन्ये ] Cf. *Āgamaḍambara* 76.16–18: दृष्टः संकर्षणप्रतापः। स हि सर्वागमप्रामाण्यवादी। राज्ञी तु श्रीसुगन्धादेवी तेष्वेव सानुक्रोशा श्रूयते। राजपुरुषोऽपि कश्चिदनुग्राहकः सात्वतानामस्तीति वार्त्ता।

**4** बाधसन्देहरहितप्रत्ययोदयात् ] Cf. *Āgamaḍambara* 82.21–22: सर्वे बोधाः स्वतोऽमी समुचितविषयावेदकत्वात्प्रमाणम्। नैषां बाधोपपातः करणकलुषताप्रत्ययो वा यदि स्यात्॥

**8** °त्रोक्तम् ] See the second verse in section 1.

---

**4** °रहित° ] $MVA_1K_1$; °हरित° $B_1$　**4** °प्रत्ययो° ] $MVA_1K_1$; °प्रयो° $B_1$　**5** परिकल्पनात् ] $K_1$; परिकल्पना $MVA_1B_1$　**8** सर्व ] $MVA_1^{pc}B_1K_1$; सर्वेषा $A_1^{ac}$　**8** °पदेशि° ] $MK_1$; °पदेश° $VA_1B_1$　**9** °दप्रमाणं ] $MVB_1K_1$; °दप्रामाणं $A_1$　**12** कंचिद् ] $K_1$; किंचिद् $MVA_1B_1$

नात्। पुरुषशीर्षस्पर्शनसुराग्रहगवालम्भनादिचोदनासु वचनान्तर-विरुद्धमर्थजातमुपदिष्टमेव।

### [6.1.1.2 प्रधाने मतिभेदाभावात्]

किंचागमानां विरोधो ऽपि नातीव विद्यते, प्रधाने पुरुषार्थे सर्वेषामविवादात्। 5

नानाविधैरागममार्गभेदैरादिश्यमाना बहवो ऽभ्युपायाः।

---

**1** पुरुषशीर्षस्पर्शन° ] *Ślokavārttikatātparyaṭīkā* ad *codanā* v. 232: "शिरोवत्" इत्यनेनापि शवप्रतिषेधशास्त्रस्य "नारं स्पृष्ट्वाऽस्थि स्नेहं सवासा जलमाविशेत्" इति तस्य विधिशास्त्रेण "पुरुषशीर्षमुपदधाति" इत्यनेन बाधः। *Ślokavārttikakāśikā* ad *codanā*, v. 232: तथा क्वचित् "पुरुषशीर्षमुपदधाति" इति विशेषवचनसामर्थ्यात् शवशरीरस्पर्शनं स्मृतिप्रतिषिद्धमपि क्रियत एव, सामान्यनिषेधदौर्बल्यादिति "शिरोवत्" इत्युक्तमिति; *Nyāyamañjarīgranthibhaṅga* 114.8: पुरुषशीर्षेति। "पुरुषशीर्षमुपदधाति" "सुराग्रहं गृह्णाति" "गामालभते" इत्यादिषु।

**1** °सुराग्रह° ] Cf. *Āgamaḍambara* 92.7 8: इह हि नियता सौत्रामण्यां सुराग्रहचोदना क्रतुभिरितरैः संसर्गं सा न हि प्रतिपद्यते॥

**2** वचनान्तरविरुद्ध° ] *Nyāyamañjarīgranthibhaṅga* 114.9: वचनान्तरविरुद्धम्। "नारं स्पृष्ट्वास्थि सस्नेहम्" इत्यादिविरुद्धम्।

**4** विरोधो ऽपि नातीव विद्यते ] Cf. *Āgamaḍambara* 88.6–14: अथवा — परमं पुरुषार्थं प्रति न चागमानां विरोधिता काचित्। आदिश्यते हि सर्वैः कैवल्यं तुल्यमेव फलम्॥ मार्गभेदास्त्वनुग्राह्य-(°ग्राह्य° ] em.; °ग्राह्याः ed.)सत्त्वबुद्ध्यनुसारिणः। तत्र तत्रोपदिश्यन्ते विचित्रास्त्राणकारिणः॥ अमी हि चानेन पथा यथेष्टं शक्याः शुभं प्रापयितुं मनुष्याः। इतीश्वरः सर्वविदेष पश्यन् नानाविधान् आदिशति स्म मार्गान्॥

**6** नानाविधै° ⋯ जाह्नवीयाः॥ = *Āgamaḍambara* 89.1–4

---

**1** °गवालम्भना° ] $K_1$; °गवालम्भा° $MVA_1B_1$ **2** °मर्थ° ] $MVA_1K_1$; °मर्थे $B_1$ **4** प्रधाने पुरुषार्थे ] $K_1$; प्रमाणे पुरुषार्थे वा M; प्रमाणानां पुरुषार्थे V; प्रमाणे पुरुषार्थे $A_1B_1$

एकत्र ते श्रेयसि संपतन्ति सिन्धौ प्रवाहा इव जाह्नवीयाः॥ तथा ह्यपवर्ग उपेयः सर्वशास्त्रेषु निर्दिश्यते। तदुपायः सर्वत्र ज्ञानमुपदिश्यते। ज्ञानविषये तु विवदन्ते। तत्रापि प्रायश आत्मविषयतायां बहूनामविप्रतिपत्तिः।

प्रकृतिपुरुषविवेकज्ञानपक्षे ऽपि प्रकृतेर्विविक्ततया पुरुष एव ज्ञेयः। नैरात्म्यवादिनस्त्वात्मशैथिल्यजननाय तथोपदिशन्ति। स्वच्छं तु ज्ञानतत्त्वं यत्तैरिष्यते, तत् स्वातन्त्र्यादनाश्रितत्वादात्मकल्पमेव। कूटस्थनित्यत्वे प्रवाहनित्यत्वे च विशेषः।

## [6.1.1.3 क्रियाभेदो न दोषाय]

एवं प्रधानयोस्तावदुपायोपेययोरविवादः। क्रिया तु विचित्रा प्रत्यागमं भवतु नाम। भस्मजटापरिग्रहो वा दण्डकमण्डलुग्रहणं वा

---

**1** एकत्र ते श्रेयसि ] *Nyāyamañjarīgranthibhaṅga* 114.10: एकत्र ते श्रेयसीति। निःश्रेयसे, सर्वेषां तदर्थत्वात्।

**1** सिन्धौ ⋯ जाह्नवीयाः ] Cf. *Āgamaḍambara* 88.15–18: प्रवेष्टुकामा बहवः पुमांसः परे यथैकत्र महागृहे वा। द्वारान्तरेणापि विशन्ति केचित् तथोत्तमे धाम्नि मुमुक्षवो ऽपि॥

**6** स्वच्छं तु ज्ञानतत्त्वं ] Cf. *Āgamaḍambara* 7.1–5: तस्माद्विज्ञानमात्रमेवेदं ⋯ अमलसंविन्मात्रनिष्ठमवतिष्ठतां वा सन्तानात्मना, सन्ततिरेव वा विच्छिद्यताम्।

**8** कूटस्थनित्यत्वे ] *Nyāyamañjarīgranthibhaṅga* 114.11 12: कूटस्थनित्यत्वेति। आत्मा कूटस्थो ऽविचलद्रूपः सन् नित्यः, ज्ञानसन्तानस्त्वविच्छेदेन प्रवहत् प्रवाह इति।

---

**1** ते ] MVB$_1$K$_1$; om. A$_1$(unmetrical)　**2** तदुपायः सर्वत्र ज्ञानमुपदिश्यते ] M A$_1$B$_1$; om. V; तदुपायश्च सर्वत्र ज्ञानमुपदिश्यते K$_1$　**3** °विषये तु ] MVA$_1$B$_1$; °विषयेषु K$_1$　**5** ऽपि ] K$_1$; तु MVA$_1$B$_1$　**6** °वादिन° ] MVA$_1$K$_1$; °वादन° B$_1$　**6** °स्त्वात्म° ] MVA$_1$B$_1$; °स्त्वास्था° K$_1$　**6** °य तथोपदिशन्ति ] MB$_1$K$_1$; °याऽपदिशन्ति V; °य तथोपादिशंति A$_1$　**7** °तत्त्वं ] MVA$_1$K$_1$; °तत्त्व B$_1$　**8** कूटस्थ° ] MVA$_1$K$_1$; कूटस्थि° B$_1$　**10** °योपेययोर° ] MA$_1$B$_1$K$_1$; °योपेययेर° V　**11** °ग्रहो वा ] MVA$_1$B$_1$; °ग्रहो K$_1$　**11** °लुग्रहणं ] MVA$_1$B$_1$; °लुधारणं K$_1$

रक्तपटधारणं वा दिगम्बरता वाऽवलम्ब्यताम्, को ऽत्र विरोधः। वेदे ऽपि किमल्पीयांसः पृथगितिकर्तव्यताकलापखचिताः स्वर्गोपायाश्चोदिताः। तस्मात्परस्परविरोधे ऽपि न प्रामाण्यविरोधः।

### [6.1.1.4 कुमारिलवचनं प्रत्युत्तरम्]

अतश्च यदुच्यते ···

सुगतो यदि सर्वज्ञः कपिलो नेति का प्रमा।
अथोभावपि सर्वज्ञौ मतभेदस्तयोः कथम्॥

इति, तदपास्तम्, प्रधाने मतिभेदाभावात्। क्वचिद्वा तद्भावे ऽपि प्रामाण्याविरोधात्।

### [6.1.2 विचिकित्सितनिषिद्धकर्मसमर्थनम्]

#### [6.1.2.1 कपालाशनादिसमर्थनम्]

न च हृदयक्रोशनहेतुकर्मोपदेशादागमान्तराणामप्रामाण्यम्, त-

---

**5** सुगतो ··· कथम्॥ *Bṛhaṭṭīkā* (=*Tattvasaṅgraha* 3148)

**7** क्वचिद्वा तद्भावे ऽपि ] *Nyāyamañjarīgranthibhaṅga* 114.13–15: क्वचिद्वा तद्भावे ऽपीति। यथा नित्यानन्दस्यात्मनो ऽवस्थानं मोक्ष इति केचित्, अन्ये चितिमात्रस्य परिशुद्धस्य चित्तसन्तानस्य, इतरे विशेषगुणवियुक्तस्यात्मन इत्युपेये भेदः।

**11** न च हृदयक्रोशन° ] *Nyāyamañjarīgranthibhaṅga* 114.15: न च हृदयक्रोशनेति। हृदयक्रोशनं विचिकित्सा।

---

**11** विरोधः ] $MVA_1B_1$; विशेषः $K_1$ **2** °श्चोदिताः ] $MVA_1K_1$; °श्चोदितः $B_1$ **2** °विरोधे ] $MVB_1K_1$; °विरोधो $A_1$ **2** ऽपि ] $MVA_1B_1$; पि पि $K_1$ **5** सुगतो ] $K_1$; कपिलो $MVA_1B_1$ **5** कपिलो ] $K_1$; सुगतो $MVA_1B_1$ **5** नेति ] $MVB_1K_1$; नति $A_1$ **6** सर्वज्ञौ ] $MVK_1$; सर्वज्ञो $A_1B_1$ **6** मत° ] $MVA_1B_1$; मति° $K_1$ **7** °पास्तम् ] $K_1$; °पास्तं भवति $MVA_1B_1$ **7** मतिभेदा° ] $K_1$; सति भेदा° $MVB_1$; सति $A_1$ **7** °द्वा तद्भावे ऽपि ] $K_1$; °च्च तद्भावे MV; °च्चातद्भावे $A_1B_1$ **8** प्रामाण्याविरोधात् ] $MVK_1$; प्रामाण्यविरोधात् $A_1B_1$ **11** हृचयक्रोशन° ] $MA_1B_1$; क्रोशन° V; हृदयकेशन° $K_1$

स्याप्रमाणतायामप्रयोजकत्वात्।

विचिकित्सा हि नृशिरःकपालाद्यशनेषु या।
साऽप्यन्यदर्शनाभ्यासभावनोपनिबन्धना॥
तथा च शान्तचित्तानां सर्वभूतदयावताम्।
वैदिकीष्वपि हिंसासु विचिकित्सा प्रवर्तते॥

अभिचारादिहिंसायां वैदिक्यामपि भवतु कामं हृदयोत्कम्पः। करणांशोपनिपातिनी हि हिंसेति लिप्सातस्तस्यां प्रवृत्तिः।

या त्वग्नीषोमीयादिपशुहिंसेतिकर्तव्यतांशस्था, यस्यां "क्रत्वर्थो हि शास्त्रादवगम्यते" इति वैधी प्रवृत्तिः, तस्यामपि कारुणिको

---

**3** °प्यन्यदर्शनाभ्यास° ] *Nyāyamañjarīgranthibhaṅga* 114.16–17: अन्यदर्शनाभ्यासेति। पुनः पुनर्यदभ्यस्तम् "नारं स्पृष्ट्वास्थि सस्नेहम्" इत्यादिदर्शनं तत्संस्कारवासितान्तःकरणानाम्।

**6** भवतु कामं हृदयोत्कम्पः ] *Nyāyamañjarīgranthibhaṅga* 114.18: भवतु कामं हृदयोत्कम्पः, तस्यां हिंसायां विधेरव्यापारात्।

**7** करणांशोपनिपातिनी हि ] *Nyāyamañjarīgranthibhaṅga* 114.18–19: कथमव्यापारश्चेत् तदाह करणांशोपनिपातिनी हीति; cf. *Nyāyamañjarī* II 113.11: करणे च श्येने, इतिकर्तव्यतायामग्नीषोमीये।

**8** पशुहिंसे° ] Cf. *Tantravārttika* ad 1.3.7 (A 204.22–23): पशुहिंसादिसंबन्धे यज्ञे तुष्यन्ति हि द्विजाः। तेभ्य एव हि यज्ञेभ्यः शाक्याः क्रुध्यन्ति पीडिताः॥

**9** क्रत्वर्थो हि शास्त्रादवगम्यते ] *Śābarabhāṣya* ad 4.1.2 (A 1194.3–5): तस्य लिप्साऽर्थलक्षणा। तस्य लिप्साऽर्थेनैव भवति, न शास्त्रेण। क्रत्वर्थो हि शास्त्रादवगम्यते, नान्यथा; *Ślokavārttikatātparyaṭīkā* ad *codanā* v. 206 यस्तु न पुरुषार्थो नापि पुरुषार्थसाधनम्, तस्याधिकारविधिसहितैः श्रुत्यादिभिरवगततादर्थ्यस्यापि प्रयोगविधिरेवानुष्ठानं प्रयुङ्क्ते, यथाऽग्नीषोमीयादिषु। तदुक्तम् "क्रत्वर्थो हि शास्त्रादवगम्यते" इति।

---

**1** °प्रमाणता° ] $VA_1B_1K_1$; °प्रामाण्यता° M　**5** वैदिकीष्वपि ] $MVK_1$; वैदिकेष्वपि $A_1B_1$　**6** भवतु कामं ] $K_1$; भवतु $MVA_1B_1$　**7** °निपातिनी ] $MVA_1B_1$; °निपाती $K_1$　**7** हि ] $K_1$; om. $MVA_1B_1$　**8** या ] $MA_1B_1K_1$; यत् V　**9** वैधी ] $MA_1B_1K_1$; वैदी V

लोकः सविचिकित्सो भवति। वदति च —

यत्र प्राणिवधो धर्मस्त्वधर्मस्तत्र कीदृशः॥

इति। न चैतावता वेदस्याप्रामाण्यम्। एवमागमान्तरेष्वपि भविष्यति।

## [6.1.2.2 निषिद्धकर्मकृतप्रत्यवायपरिहारः]

यत्त्वागमान्तरेभ्यः कौलादिभ्यः खेचरतादर्थसिद्धावपि निषिद्धाचरणकृतः कालान्तरे प्रत्यवायो ऽवश्यंभावीत्युक्तम्, तदपि न युक्तम्, तस्यार्थस्य तदागमनिषिद्धत्वाभावात्। आगमान्तरनिषिद्धत्वे ऽपि वैकल्पिकत्वकल्पनोपपत्तेः। परपुरुषार्थप्राप्त्युपायत्वाच्च तस्य तस्मिन् सिद्धे कुतः प्रत्यवायः।

भवतु वा कालान्तरे ततः प्रत्यवायः, तथाऽप्यधिकारिभेदेन तत्फले कर्मणि चोद्यमाने श्येनादाविव नागमप्रामाण्यमत्र हीयते।

---

**7** °त्युक्तम् ] See the last two verses in section 5.2.2.

**11** तथाऽप्यधिकारिभेदेन ] *Nyāyamañjarīgranthibhaṅga* 114.26–27: तथाप्यधिकारिभेदेनेति। यस्तज्जन्यफलकामस्तदपेक्षया।

---

**1** सविचिकित्सो ] $MVB_1K_1$; सविचिकित्सा $A_1$ **2** धर्मस्त्वधर्मस्तत्र ] $MVB_1K_1$; धर्मस्तत्र $A_1$(eyeskip) **3** °प्रामाण्यम् ] $MVA_1K_1$; °प्रमाण्यम् $B_1$ **4** भविष्यति ] $MVB_1K_1$; भाष्यति $A_1$ **6** खेचरता° ] $MVA_1B_1$; खेचरा° $K_1$ **7** ऽवश्यं° ] $MVA_1K_1$; वाच्यं° $B_1$ **7** °भावी° ] $MVA_1B_1$; °भवती° $K_1$ **8** तदागम° ] $MA_1B_1K_1$; तदागति° V **9** वैकल्पिकत्व° ] $MVA_1B_1$; वैकल्पिक° $K_1$ **9** °नोपपत्तेः ] $MVK_1$; °नोत्पत्तेः $A_1B_1$ **9** परपुरुषा° ] $A_1B_1K_1$; पुरुषा° MV **11** °कारिभेदेन ] $MVA_1K_1$; °कारभेदन $B_1$

"श्येनेनाभिचरन् यजेत" इत्यत्र "अभिचरन्" इति शत्रा लङ्क्तिनिषेधमधिकारिणमाचष्टे। तस्य च श्येनयागश्चोदितः। स च तत्प्रयोगात्कृतवधः प्रत्यवैत्येव। न च वेदस्याप्रामाण्यम्। उक्तं च "उभयमिह चोदनया लक्ष्यते — अर्थो ऽनर्थश्च" इति। अधिकारभेदाच्च विचित्रकर्मचोदना नानुपपन्ना। मरणकामस्य सर्वस्वारश्चोदितः, आयुष्कामस्य कृष्णलचरुः। तस्मादेतदपि नाप्रामाण्यनिमित्तम्।

---

1 श्येनेनाभिचरन् ··· °यागश्चोदितः ] Cf. *Nyāyamañjarī* II 112.6–9 (*niyogavādin*): अत एव श्येनादेरधर्मत्वम्। तत्र हि "अभिचरन्" इति शत्रा शत्रुं वैदिकेनोपायेन जिघांसुरधिकारी दर्शितः तस्य। न तत्र शास्त्रं प्रवर्तकम्। "जानात्येवासौ मयैतत् कर्तव्यम्, उपायं तु न वेद" (*Śābarabhāṣya* ad 6.2.14) इत्येवम्। उपायमात्रमस्योपदिश्यते श्येनः।

2 शत्रा लङ्क्तिनिषेध° ] *Nyāyamañjarīgranthibhaṅga* 114.27–115.1: शत्रा लङ्क्तिनिषेधमिति। अभिचरन्निति हि शतृप्रत्ययो लक्षणे। लक्षणं च पूर्वसिद्धं भवति। "शयाना भुञ्जते यवनाः" इति शयनस्य पूर्वसिद्धस्य लक्षणत्वात्।

4 उभयमिह ··· ऽनर्थश्च ] *Śābarabhāṣya* ad 1.1.2 (Frauwallner 20.12)

5 अधिकारभेदाच्च ··· कृष्णलचरुः ] Cf. *Āgamaḍambara* 88.1–4: श्रुतावायुष्कामं प्रति हि विहितः कृष्णलचरुस् तथा सर्वस्वारः किल मरणकामस्य पठितः। विरोधश्चैतस्यां यदि विषयभेदात्परिहृतो भवद्भिः सैव स्यात्सरणिरिह तीर्थान्तरगिराम्॥

5 मरणकामस्य सर्वस्वार° ] *Nyāyamañjarīgranthibhaṅga* 115.1: मरणकामस्य सर्वस्वार इति। "सर्वस्वारेण मरणकामो यजेत"।

6 आयुष्कामस्य ] *Nyāyamañjarīgranthibhaṅga* 115.1: आयुष्कामस्येति। "शतकृष्णलं चरुं प्राजापत्यमायुष्कामो निर्वपेत्" इति।

---

1 श्येनेना° ] $MVA_1K_1$; श्येनोना° $B_1$　1 शत्रा ] $M^{ka}A_1B_1K_1$; शता MV　2 स च ··· सर्वस्वारश्चोदितः ] $MVA_1B_1$; om. $K_1$(eyeskip)　3 प्रत्यवैत्येव ] $MVA_1^{pc}B_1$; प्रत्यवैत्येवे $A_1^{ac}$　5 °कारभेदाच्च ··· मरण° ] $MVA_1$; om. $B_1$　5 नानुपपन्ना ] M; नानुपन्ना $VA_1$　6 कृष्णलचरुः ] $MVB_1K_1$; कृष्णलरुः $A_1$

### [6.1.3 जातिवादनिराकरणसमर्थनम्]

यदपि बौद्धागमे जातिवादनिराकरणम्, तदपि सर्वानुग्रहप्रवणकरुणातिशयप्रशंसापरम्, न यथाश्रुतमवगन्तव्यम्। तथा च तत्रैव पठ्यते "न जातिकायदुष्टान् प्रव्राजयेत्" इति। तस्मात् सर्वेषामागमानामाप्तैः कपिलसुगतार्हत्प्रभृतिभिः प्रणीतानां प्रामाण्यमिति युक्तम्।

### [6.2 सर्वागमेश्वरकर्तृत्वपक्षः]

अन्ये मन्यन्ते — सर्वागमानामीश्वर एव भगवान् प्रणेतेति।

### [6.2.1 नानाशरीरपरिग्रहात्]

स हि सकलप्राणिनां कर्मविपाकमनेकप्रकारमवलोकयन् करुणया ताननुग्रहीतुमपवर्गप्राप्तिमार्गं बहुविधमुत्पश्यन्नाशयानुसारेण केषांचित्क्वचित्कर्मणि योग्यतामवगम्य तं तमुपायमुपदिशति। स्ववि-

---

**2** जातिवादनिराकरणम् ] See section 5.2.3.3.

**4** न जातिकायदुष्टान् प्रव्राजयेत् ] Cf. *Vinayasūtra* 26.29 (v. 153): न जातिकायदुष्टं प्रव्रजितमुपस्थापयेत्। (I thank Prof. Isaacson for this reference.)

**8** अन्ये ] Cf. *Āgamaḍambara* 87.7–10: वेदानामेक एवातुलकुशलपथादेशकानेकशाखाविक्षिप्तानां विधाता कविरमलमतिः को ऽपि देवः पुराणः। तद्वत्सर्वागमानां भवतु स भगवानेक एव प्रणेता नानात्वं कर्तुरित्थं न सुवचमिति हि प्रागुपन्यस्तमेतत्॥

---

**3** °प्रवण° ] $MA_1B_1K_1$; °प्रणव° V **3** न यथाश्रुतमवगन्तव्यम् ] $K_1$; न च यथाश्रुतमवगन्तव्यम् $MVB_1$; om. $A_1$ **3** तत्रैव ] $K_1$; तत्रैतत् MV; तत्रेव $A_1$ $B_1$ **4** °काय° ] $VB_1K_1$; °कार्य° $MA_1$ **5** कपिल° ] $MVB_1K_1$; कपि° $A_1$ **8** अन्ये ] $MVA_1B_1$; अपरे $K_1$ **11** °नुसारेण ] $MVA_1$; °नुचारेण $B_1$; °नुसारेण प्राणिनां $K_1$ **12** °मुपदिशति ] $VB_1K_1$; °मुपदिश्यति M; °मवदिशति $A_1$

भूतिमहिम्ना च नानाशरीरपरिग्रहात् स एव संज्ञाभेदानुपगच्छति। अर्हन्निति कपिल इति सुगत इति स एवोच्यते भगवान्, नानासर्वज्ञकल्पनायां यत्नगौरवप्रसङ्गात्।

### [6.2.2 बुद्धशरीरपरिग्रहसमर्थनम्]

ननु बुद्धः शुद्धोदनस्य राज्ञो ऽपत्यम्, स कथमीश्वरो भवेत्। परिहृतमेतद् भगवता कृष्णद्वैपायनेन —

यदा यदा हि धर्मस्य ग्लानिर् भवति भारत।
अभ्युत्थानमधर्मस्य, तदाऽऽत्मानं सृजाम्यहम्॥

इति। शरीरमेव शुद्धोदनस्यापत्यम्, नात्मा। अत एव प्रतियुगं विष्णुरेव भगवान् धर्मरूपेणावतरतीत्यागमविदः प्रतिपन्नाः।

### [6.2.3 महाजनप्रसिद्धिमहत्त्वकृशत्वे]

ननु वेदसमानकर्तृकेष्वागमान्तरेषु कथं तादृशो महाजनसंप्रत्ययो नास्ति। एवं नास्ति। तेन वर्त्मना भगवता कतिपये प्राणिनो ऽनुगृहीताः, येषां तादृश आशयो लक्षितः। वैदिकेन तु वर्त्मना

---

1 संज्ञाभेदा° ] Cf. *Āgamaḍambara* 89.10–18: कर्तृभेदव्यपदेशः पुनरन्यथासिद्धः — एको ऽप्यसौ सकलसत्त्वहिताय कायमिच्छाविनिर्मितमनेकमुपादधानः। नानागमानुपदिशन् विविधा बिभर्ति तास्ताः समस्तभुवनप्रथिताः समाख्याः॥ एकः शिवः पशुपतिः कपिलो ऽथ विष्णुः संकर्षणो जिनमुनिः सुगतो मनुर्वा। संज्ञाः परं पृथगिमास् तनवो ऽपि कामम् अव्याकृते तु परमात्मनि नास्ति भेदः॥ 7 यदा ··· सृजाम्यहम्॥ *Mahābhārata* 3.187.26: यदा यदा च धर्मस्य ग्लानिर्भवति सत्तम। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥

---

1 नाना° ] $MVA_1K_1$; ना° $B_1$　1 स एव ] $MVA_1B_1$; सन्तं $K_1$　2 °च्छति। अर्हन्निति ] $MVA_1B_1$; °च्छन्नर्हन्निति $K_1$　5 °स्य राज्ञो ऽप° ] $MA_1B_1K_1$; °स्याऽप° V　6 °मेतद् भगव° ] $MVB_1$; °मेङ्गव° $A_1$; °मेतद्+++ $K_1$　9 अत एव ] $A_1B_1K_1$; अतः MV　10 °दः प्र° ] $MVA_1B_1$; +++ $K_1$　12 वेद° ] $MVB_1K_1$; वद° $A_1$　14 ऽनुगृही° ] $MVB_1K_1$; नुग्रही° $A_1$

निःसंख्याकाः प्राणिनो ऽनुगृहीताः — इति तत्र महानादरः, आगमान्तरेषु कृश इति।

## [6.2.4 परस्परविरोधाभावः]

एककर्तृत्वे परस्परविरोधः कथमिति चेत्। वेदैरेवात्र वर्णितः समाधिः। तेष्वपि भूम्ना परस्परविरोधदर्शनादित्युक्तम्। तस्मादीश्वरप्रणीतत्वादेव सर्वागमानां प्रामाण्यम्।

## [6.3 सर्वागमवेदमूलत्वपक्षः]

अपरे पुनर्वेदमूलत्वेन सर्वागमप्रामाण्यमभ्युपागमन्।

## [6.3.1 स्मृतिप्रामाण्यन्यायातिदेशः]

यो हि मन्वादिदेशनानां वेदमूलतायां न्याय उक्तः —

भ्रान्तेर् अनुभवाद्वाऽपि पुंवाक्याद् विप्रलम्भनात्।

---

4 एककर्तृत्वे ⋯ चेत् ] Cf. *Āgamaḍambara* 87.12–15: परस्परविरोधिनो ननु च सर्व एवागमाः समानमभिधेयमेषु न हि किञ्चिदीक्षामहे। त एकनरनिर्मिता इति कथं नु मन्यामहे प्रमाणमितरेतरप्रतिहताश्च ते वा कथम्॥

4 वेदैरेवात्र ⋯ समाधिः ] Cf. *Āgamaḍambara* 87.20–21: विभागमवलम्ब्य कंचन विरोधिताऽपास्यते यदि श्रुतिषु, साऽऽगमान्तरवचःसु तुल्या गतिः॥

5 परस्परविरोध° ] Cf. *Āgamaḍambara* 88.5–6: एवं तावदितरेतरविरोधिनीष्वपि वेदचोदनास्विव न तीर्थान्तरदेशनासु दोषः (em.; द्वेषः ed.)।

5 °त्युक्तम् ] See section 6.1.1.1.

10 उक्तः ] See section 2.1.1.

---

1 निःसंख्या° ] $MB_1K_1$; निःसंख्य° V; निःसख्या° $A_1$ 1 °काः प्राणिनो ऽनु° ] $MVA_1B_1$; °क्षप्रतिनो $K_1$ 1 इति ] $MVA_1B_1$; ++ $K_1$ 4 एककर्तृकत्वे ] $A_1B_1K_1$; एककर्तृके MV 5 भूम्ना ] $A_1B_1$; भूम्नः MV; भूम्नां $K_1$ 5 °विरोध° ] $A_1B_1K_1$; °विरोधस्य MV 10 °देशनानां ] $MVK_1$; °देशनायां $M^{ka}A_1B_1$ 10 उक्तः ] $MVA_1B_1$; उक्तं $K_1$ 11 विप्रलम्भनात् ] $K_1$; विप्रलम्भकात् $MVA_1B_1$

दृष्टानुगुण्यसामर्थ्याच्चोदनैव लघीयसी॥

इति, स सर्वागमेष्वपि समानः। न च मन्वादिस्मृतीनां मूलभूता श्रुतिरुपलभ्यते। अनुमानेन तु तत्कल्पनमागमान्तरेष्वपि तुल्यम्।

## [6.3.2 कर्तृसामान्यनिरासः]

ननु चोक्तम् — "अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्" इति, तच्चेह नास्ति — इति कथं श्रुत्यनुमानम्। नैष दोषः।

एकाधिकारावगमो न प्रामाण्ये प्रयोजकः।
मिश्रानुष्ठानसिद्धौ तु कामं भवतु कारणम्॥

न च पृथगनुष्ठीयमानमपि कर्म न प्रमाणमूलं भवति, वर्णाश्रमभेदानुष्ठेयकर्मवत्॥

कर्तृसामान्यशून्यत्वादथ मूलान्तरोदयः।
तदसद्, बाधकाभावाद् भ्रान्त्यादिप्रतिषेधनात्॥
प्रत्यक्षमूलतायां तु गुर्वी भवति कल्पना।
वेदस्त्वनन्तशाखत्वान्मूलं तत्र सुसंगतम्॥

---

**5** चोक्तम् ] See section 2.1.5.

**5** अपि वा ··· स्यात् ] *Jaiminisūtra* 1.3.2

**8** मिश्रानुष्ठान° ] Cf. Section 2.1.5: आचमनादिस्मार्तपदार्थसंवलितवेदिस्तरणादिवैदिकपदार्थप्रयोगदर्शनात्।

**12** बाधकाभावाद् भ्रान्त्यादिप्रतिषेधनात् ] Cf. Section 2.1.1: तथा हि न तावन् मन्वादिदेशना भ्रान्तिमूलाः संभाव्यन्ते, बाधकाभावात्।

---

**1** °गुण्य° ] $MA_1B_1$; °गुण° $VK_1$　**1** °र्थ्याच्चोद° ] $MVA_1B_1$; °र्थ्याचोद° $K_1$　**2** स ] $MVK_1$; om. $A_1B_1$　**2** सर्वागमेष्वपि ] $A_1B_1K_1$; सर्वागमेषु MV　**3** तत्कल्पन° ] $MVA_1B_1$; तत्कल्पनाया° $K_1$　**8** मिश्रा° ] $MVB_1K_1$; मिष्टा° $A_1$　**9** वर्णा° ] $M^{back}VA_1B_1K_1$; र्णा° M　**13** भवति ] $MVB_1K_1$; भति $A_1$　**14** वेदस्त्व° ] $MVA_1B_1$; वेदास्त्व° $K_1$　**14** सुसंगतम् ] $MA_1B_1K_1$; स्वसंगतम् V

[6.3.3 वेदमूलत्वसमर्थनम्]

नन्वत्र वेदमूलत्वे द्वेषो वेदविदां कथम्।
गत्वा त एव पृच्छ्यन्तां साक्षर्यं यदि विद्यते॥
गोवधे वा कथं तेषां द्वेषः सुस्पष्टवैदिके।
प्रत्युक्तं च विरुद्धत्वं, शाखानन्त्याच्च दुर्गमम्॥
किमियद्वेदसर्वस्वं यावदस्मन्मुखे स्थितम्।
शाखान्तराद्वा संवादो न लभ्येतेति का प्रमा॥

तथा च सांख्यशास्त्रप्रसिद्धत्रिगुणात्मकप्रकृतिसूचनपरम् "अजामेकां लोहितशुक्लकृष्णाम्" इति वैदिकं लिङ्गमुपलभ्यते। निर्ग्रन्थग्रथिततपस्सचिवतत्त्वज्ञानशंसी चायमनुवादो दृश्यते "मुनयो वातरशनाः" इति। एवं रक्तपटपरिग्रहभस्मकपालधारणादिमूलमप्यभियुक्ता लभ-

**5** प्रत्युक्तं ] See section 6.1.1.1.

**9** अजामेकां ··· °कृष्णाम् ] *Taittirīyāraṇyaka* 10.10.5a; *Nyāyamañjarīgranthibhaṅga* 115.5–8: अजामेकामिति। "अजामेकां लोहितकृष्णशुक्लां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको भजमानो ऽनुशेते जहाति चैनां भुक्तभोगामजो ऽन्यः" इति। अत्र लोहितशुक्लकृष्णग्रहणेन रजःसत्त्वतमोरूपतां तस्या आह। अनुशेते पुनः पुनस्तया संबन्धं भजते।

**10** मुनयो वातरशनाः ] *Ṛgveda* 10.136.2a; *Nyāyamañjarīgranthibhaṅga* 115.8–11: मुनयो वातरशना इति। वात एव रशना वासो ग्रन्थनं येषां ते वातरशना। अतो वाससो ऽभावादेव वातस्तेषां रशना। अत एव निर्ग्रन्था भण्यन्ते। "रसना" इति तु पाठे रस्यत आस्वाद्यत इति रसनम्, वात एव रसनं येषां वायुभक्षा इत्यर्थः।

**11** एवं रक्तपटपरिग्रह° ] *Nyāyamañjarīgranthibhaṅga* 115.11–14: एवं रक्त-

**3** °न्तां साक्षर्यं यदि ] $MA_1B_1$; °न्तां येषां द्वेषादि V; °न्तान्दाक्षिण्यं यदि $K_1$ **4** सुस्पष्ट° ] $MVA_1K_1$; संपुष्ट° $B_1$ **6** किमियद्वे° ] $MVA_1B_1$; किमिदं वे° $K_1$ **6** °स्मन्मुखे ] $MVB_1K_1$; °स्मन्मन्मुखे $A_1$ **8** तथा च ] $MVA_1^{pc}B_1K_1$; तथा च विरुद्धत्व $A_1^{ac}$ **9** वैदिकं ] $MVA_1B_1$; वैदिक° $K_1$ **9** °ग्रथित° ] $K_1$; °कथित° $MVA_1B_1$ **10** °तपस्सचिवतत्त्व° ] $MA_1B_1K_1$; °वचसः चित्तत्व° V **10** वात° ] $MVB_1K_1$; वा° $A_1$ **11** °पट° ] $MVK_1$; °पठपट° $A_1$; °पटपट° $B_1$

न्त एव।

मन्वादिस्मृतिवत्कर्तृसामान्यासंभवे ऽप्यतः।
प्रमाणं वेदमूलत्वाद् वाच्या सर्वागमस्मृतिः॥

ततश्च

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वो ऽभिहितो वेदे, सर्वज्ञानमयो हि सः॥

इत्यत्र यथा मनुग्रहणं गौतमयमापस्तम्बसंवर्तकादिस्मृतिकारोपलक्षणम्, एवमर्हत्कपिलसुगताद्युपलक्षणपरमपि व्याख्येयम्।

## [6.3.4 लोकायताद्यागमनिरासः]

ननु च लोकायतागमे ऽप्येवं प्रामाण्यं प्राप्नोति, "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञाऽस्ति" इति वेदमूलत्वदर्शनात्। ततश्च लोकायतदर्शने प्रमाणीभूते सति स्वस्ति सर्वागमेभ्यः।

उच्यते।

---

पटपरिग्रहेति। तथा हि रक्तपटदर्शनसंस्थोपनिषद्वाक्यमुदाहरति — "पौल्कसो ऽपौल्कसश्चाण्डालो ऽचाण्डालो ब्राह्मणो ऽब्राह्मणः श्रमणो ऽश्रमणः" इत्यादि तद्दर्शयति। प्रसिद्धामलमार्गप्रवृत्तं श्रमणमाचक्षते "श्रामण्यममलो मार्गः" इति हि त आहुः।

**5** यः ⋯ हि सः॥ *Manusmṛti* 2.7

**11** विज्ञानघन ⋯ संज्ञाऽस्ति ] *Bṛhadāraṇyakopaniṣad* 4.5.13; quoted again in *Nyāyamañjarī* II 268.2–3.

---

**2** °सामान्या° ] $K_1$; °साम्यस्या° $MVA_1B_1$　**3** सर्वागम° ] $MA_1B_1K_1$; सर्वागमा V　**7** मनुग्रहणं ] $MVA_1$; मनुर्ग्रहणं $B_1$; मनुग्रहण $K_1$　**7** °पस्तम्ब° ] $MVK_1$; °पस्तंभ° $A_1B_1$　**7** °संवर्तकादि° ] $MA_1B_1$; °संवर्तकातिकादि° V; °संवर्त्तादि° $K_1$　**7** °स्मृतिकारो° ] $MA_1B_1K_1$; °स्मृत्यन्तरो° V　**10** लोकायतागमे ] $K_1$; लोकायताद्यागमे $MVA_1B_1$; लोकायताद्यागमो V　**12** वेदमूलत्व° ] $K_1$; वेदमूल° $MVA_1B_1$　**13** प्रमाणी° ] $MA_1B_1K_1$; प्रमाण° V　**13** °भूते सति ] $MVA_1B_1$; °भूते $K_1$

न हि लोकायते किंचित्कर्तव्यमुपदिश्यते।
वैतण्डिककथैवासौ, न पुनः कश्चिदागमः॥

ननु "यावज्जीवं सुखं जीवेत्" इति तत्रोपदिश्यत एव। न, स्वभावसिद्धत्वेनात्रोपदेशवैफल्यात्। "धर्मो न कार्यः" "तदुपदेशेषु न प्रत्येतव्यम्" इत्येवं वा यदुपदिश्यते, तत् प्रतिविहितमेव, पूर्वपक्षवचनमूलत्वाल्लोकायतदर्शनस्य। तथा च तत्रोत्तरब्राह्मणं भवति "न वा अरे अहं मोहं ब्रवीमि, अविनाशी वा अरे ऽयमात्मा, मात्रासंसर्गस्त्वस्य भवति" इति। तदेवं पूर्वपक्षवचनमूलत्वाल्लोकायतशास्त्रमपि न स्वतन्त्रम्, उत्तरवाक्यप्रतिहतत्वात्तु तदनादरणीयम्।

---

**2** वैतण्डिक° ] *Nyāyamañjarī* II 602.13–603.2: "स प्रतिपक्षस्थापनाहीनो वितण्डा" (*Nyāyasūtra* 1.2.3)। स एव यथोक्तलक्षणको जल्पो वितण्डा भवति। को विशेष इति चेत्। आह "प्रतिपक्षस्थापनाहीनः" इति। ··· तमसावभ्युपगच्छत्येव, न तत्र साधनमुपदिशति, परपक्षमेवाक्षिपन्नास्ते। तर्हि साधनाद्विना पक्षो ऽपि सो ऽस्य नास्त्येवेति।

**3** यावज्जीवं सुखं जीवेत् ] Again quoted in *Nyāyamañjarī* II 348.13–14: यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः। भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥

**7** न वा ··· भवति ] *Bṛhadāraṇyakopaniṣad* 4.5.14; *Śābarabhāṣya* ad 1.1.5 (Frauwallner 60.17–22): अथ यदुक्तम् "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञास्ति" इति। अत्रोच्यते। अत्रैव "मा भगवान् मोहान्तमापीपदत्" इति परिचोदनोत्तरकाले ऽपह्नुत्य मोहाभिप्रायमस्य वर्णितवान् "न वा अरे मोहं ब्रवीमि, अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा, मात्रासंसर्गस्त्वस्य भवति" इति।

---

**3** ननु ] $K_1$; ननु च $MVA_1B_1$ **3** यावज्जीवं ] $MVA_1B_1$; यावज्जीवेत् $K_1$ **3** जीवेत्" इति ] $MVA_1B_1$; जीवेन्नास्ति मृत्योरगोचर इति $K_1$ **3** °त एव। न ] $B_1K_1$; °त एवं न $MA_1$; °ते। न V **4** तदुपदेशेषु ··· तथा च तत्रोत्तर° ] $MVB_1K_1$; तत्तर° $A_1$ **5** °त्येवं ] $MVK_1$; °त्येव $B_1$ **5** वा यदु° ] $MVB_1$; वायुमु° $K_1$ **6** °दर्शनस्य। तथा च तत्रोत्तर° ··· °ल्लोकायत° ] $MVB_1$; °त्तर° ··· $A_1$; om. $K_1$(eyeskip) **7** न वा ] $MVA_1^{pc}B_1$; न वाच्य $A_1^{ac}$ **9** स्वतन्त्रम् ] $MVB_1$; स्वतंत्र $A_1$; तन्त्रम् $K_1$ **9** °त्वात्तु ] $MVA_1B_1$; °त्वात् $K_1$ **9** तदनादरणीयम् ] $MVB_1K_1$; तदनारणीयम् $A_1$

शास्त्रान्तराणां तु पूर्वपक्षवाक्यमूलत्वकल्पनमयुक्तम्, समनन्तरमेव तत्प्रतिपक्षवचनानुपलब्धेः ― इत्यतो वेदमूलत्वात्सर्वागमाः प्रमाणम्।

## [6.4 नीलाम्बरव्रतनिषेधः]

सर्वागमप्रमाणत्वे नन्वेवमुपपादिते।
अहमप्यद्य यत्किंचिदागमं रचयामि चेत्॥
तस्यापि हि प्रमाणत्वं दिनैः कतिपयैर् भवेत्।
तस्मिन्नपि न पूर्वोक्तो न्यायो भवति दुर्वचः॥

जरत्पुस्तकलिखितं यदपि तदपि किंचिदानीय केनचित् किल धूर्तेन प्रख्याप्यते "महानयमागमः" इति, तत्राप्याप्त एव प्रणेता कल्प्यताम्। यादृशं तादृशं वा वैदिकं वचनमुच्यतां मूलभूतमिति।

नैतदस्त्यविगीतां ये प्रसिद्धिं प्रापुरागमाः।
कृतश्च बहुभिर्येषां शिष्टैरिह परिग्रहः॥
अद्य प्रवर्तमानाश्च नापूर्वा इव भान्ति ये।
येषां न मूलं लोभादि येभ्यो नोद्विजते जनः॥
तेषामेव प्रमाणत्वमागमानामिहेष्यते।
न मृष्यते तु यत्किंचित्प्रमाणं कुट्टिनीमतम्॥

तथा हि

---

**2** °गमाः ] $MA_1B_1K_1$; °गमः V　**5** °मुपपादिते ] $MVB_1K_1$; °मपपादिते $A_1$　**6** यत्किंचि° ] $MVA_1B_1$; यंकिंचि° $K_1$　**7** तस्यापि ⋯ भवेत् ] $MVB_1K_1$; om. $A_1$　**8** पूर्वोक्तो ] $K_1$; पूर्वोक्तः $MVA_1B_1$　**9** तदपि किंचिदानीय केनचित् किल ] em.; तदपि किंचिदिदानीं केनापि $MVA_1B_1$; तदकिञ्चिदानीय केनचित्किल $K_1$　**10** महानय° ⋯ °भूतमिति ] $MA_1B_1K_1$; om. V　**11** वा ] $K_1$; om. $MA_1B_1$　**11** मूल° ] $MA_1B_1$; भूमूल° $K_1$　**12** नैतदस्त्यविगीतां ] $MA_1B_1K_1$; महाजनसमूहे V　**12** ये ] $MVB_1K_1$; om. $A_1$(unmetrical)　**14** नापूर्वा ] $MVB_1K_1$; नापूर्व $A_1$　**14** इव ] $MVA_1B_1$; इति $K_1$　**17** तु यत्किंचि° ] $MVB_1K_1$; तुत्किंचि° $A_1$　**17** कुट्टिनी° ] $VK_1$; कुट्टनी° $MA_1B_1$

असितैकपटनिवीताविद्युतस्त्रीपुंसविहितबहुचेष्टम् ।
नीलाम्बरव्रतमिदं किल कल्पितमासीद् विटैः कैश्चित् ॥
तदपूर्वमिति विदित्वा निवारयामास धर्मतत्त्वज्ञः ।
राजा शङ्करवर्मा न पुनर् जैनादिमतमेवम् ॥
इत्याप्तोक्तत्वहेतोः परिमुषितपरोदीरिताशेषदोषाद्
एषां वेदागमानां सुदृढमुपगते मानभावे प्ररोहम् ।
तन्मूलत्वात्तथात्वं पुरुषवचनतो वाऽस्तु शास्त्रान्तराणां
तद्द्वारेणापि वक्तुं न खलु कलुषता शक्यते वेदवाचाम् ॥

---

**8** तद्द्वारेणापि ··· वेदवाचाम् ] Cf. *Ślokavārttika codanā*, v. 69: अतो वक्तृनधीनत्वात्प्रामाण्ये तदुपासनम् । न युक्तम्, अप्रमाणत्वे कल्प्ये तत्प्रार्थना भवेत् ॥

---

**1** असितैक° ] $A_1B_1K_1$; अमितैक° MV **1** °वियुत° ] $M^{back}A_1B_1$; °नियत° MV; °विहित° $K_1$ **2** °व्रतमिदं ] $MVA_1B_1$; °व्रतं $K_1$(unmetrical) **5** °दोषाद् एषां ] $MVB_1$; °दोषां $A_1$(unmetrical); °दोषादोषान् $K_1$ **7** तन्मूल° ] $VK_1$; उन्मूल° $MA_1B_1$ **8** कलुषता ] $MVB_1K_1$; कलषता $A_1$ **8** वेदवाचाम् ] $MVB_1K_1$; वेदवाच्यम् $M^{ka}A_1$